পার্থিবীর্যা হিরণ্যবর্ণা যজ্ঞিয়াস্তা ন আপঃ শিবাঃ শংস্যোনাঃ স্যুহবা ভবন্তু। অস্যার্থঃ। আপঃ পানীয়ানি পয়সা ক্ষীরেণ সংবভূবুঃ সঙ্গতাঃ মাধুর্য্যশৈত্যাদিনা একীভাব-
মাপন্নাঃ কাস্তা আপঃ যা দিব্যাঃ দিবি স্বর্গে ভূতাঃ যা অন্তরীক্ষাঃ আকাশভবাঃ উত অপ্যর্থে যাঃ পার্থিবীঃ পৃথিবীসম্বন্ধাঃ পুনঃ কীদৃশ্যঃ হিরণ্যবর্ণাঃ রজতবদ্বিশুদ্ধাঃ।



নমঃ। ইত্যুৎসৃজ্য ব্রাহ্মণহস্তে হর্ঘ্যং দদ্যাৎ। ততঃ প্রেতব্রাহ্মণপক্ষে ব্রাহ্মণে পূর্ব্ববৎ দক্ষিণাগ্রং পবিত্রং দত্ত্বা জলান্তরং পুষ্পান্তরঞ্চ দত্ত্বা
পুষ্পান্তরেণ ওঁ শিরঃপ্রভৃতিসর্ব্বগাত্রেভ্যো নমঃ। ইত্যনেন সংপূজ্য তৎপাত্রং বামহস্তে ধৃত্বা দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা
ইতি পঠিত্বা ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তে হর্ঘ্যং স্বধা। ইত্যুৎসৃজ্য ওঁ যে সমানাঃ সমনসঃ পিতরো যমরাজ্যে তেষাং
লোকঃ স্বধা নমো যজ্ঞো দেবেষু কল্পতাম্। ওঁ যে সমানাঃ সমনসো জীবা জীবেষু মামকাঃ। তেষাং শ্রীর্ময়ি কল্পতামস্মিন্
লোকে শতং সমা ইতি মন্ত্রাভ্যাং প্রেতার্ঘ্যজলং চতুর্ভাগং কৃত্বা ভাগমেকং প্রেতব্রাহ্মণহস্তে দদ্যাৎ। ততঃ পিতামহাদিব্রাহ্মণে 
পূর্ব্ববদ্দক্ষিণাগ্রং পবিত্রং দত্ত্বা জলান্তরং পুষ্পান্তরঞ্চ দত্ত্বা পুষ্পান্তরেণ ওঁ শিরঃপ্রভৃতিসর্ব্বগাত্রেভ্যো নমঃ ইতি সম্পূজ্য পিতা-
মহার্ঘ্যপাত্রং বামহস্তে কৃত্বা দক্ষিণহস্তেনাচ্ছাদ্য ওঁ যা দিব্যা ইতি পঠিত্বা ওঁ অমুক গোত্র পিতামহামুক দেবশর্ম্মন্নেতত্তেহর্ঘ্যং ওঁ
যে চাত্র ত্বামনুযাংশ্চ ত্বমনু তস্মৈ তে স্বধা ইত্যুৎসৃজ্য ওঁ যে সমানাঃ সমনসঃ ইতি মন্ত্রাভ্যাং প্রেতার্ঘ্যজলভাগমেকং তত্র
মিশ্রয়িত্বা পিতামহব্রাহ্মণহস্তে দদ্যাৎ। সংস্রবসহিতপাত্রং পূর্ব্বস্থানে স্থাপয়েৎ। এবং প্রপিতামহবৃদ্ধপ্রপিতামহয়োরর্ঘ্যং দত্ত্বা
সংস্রবসহিতং পাত্রং তত্রৈব স্থাপয়েৎ। ততো হস্তৌ প্রক্ষাল্যাচম্য দক্ষিণশ্রবণং স্পৃষ্ট্বা প্রপিতামহবৃদ্ধপ্রপিতামহপাত্রস্থ

হিরণ্যং রজতে হপি দৃশ্যতে। তথা চ হিরণ্যং রজতেহপি স্যাৎ সুবর্ণে চ কপর্দ্দকে। পুনঃ কীদৃশ্যঃ যজ্ঞিয়াঃ যজ্ঞার্হাঃ। তদর্হতীতি ঈয়প্রত্যয়ঃ ছন্দসি বহুলমিতি হ্রস্বঃ।
স্তদেবম্ভূতা আপো নো হস্মাকং শিবা ভবন্তু কল্যাণপ্রদা ভবন্ত্বিত্যর্থঃ। ন কেবলং কল্যাণপ্রদা এব কিন্তু শংস্যোনাঃ সুখপ্রদা অপি ভবন্তু। ন কেবলং শংস্যোনা এব স্যুহবা

অপি তু মন্ত্র ব্রাহ্মণহস্তে দত্তাঃ সুখেনাহুতা ভবন্তু ইত্যর্থঃ। শৈত্যাদিগুণেনাভিব্যঞ্জনেন ব্রাহ্মণস্য সুখসম্পাদকা ভবন্তু ইত্যর্থঃ। স্যোনা ইতি সুখস্য নাম নিরুক্তেতে চ দৃশ্যতে।
স্যোনঃ স্যাৎ সুখতৃষ্ণয়োরিতি। পার্থিবীরিতি বিভক্তিব্যত্যয়ে প্রথমায়াং দ্বিতীয়েতি। (১১) প্রথমপাত্রে সংস্রবান্ সমবনীয় পাত্রং ন্যুব্জং করোতীতি কাত্যায়নঃ। মন্ত্রো

॥ * ॥ সপিণ্ডীকরণশ্রাদ্ধপ্রয়োগঃ ॥ * ॥

জলং প্রপিতামহ পাত্রে নিধায় বৃদ্ধপ্রপিতামহপাত্রেণাচ্ছাদ্য ওঁ পিতৃভ্যঃ স্থানমসীত্যনেন স্ববামে সমূলদর্ভোপরি ন্যুব্জং কুর্য্যাৎ [ ১১ ]। ততঃ উত্তরামুখঃ পাতিতদক্ষিণজানুরুপবীতী ওঁ পুরূরবো মাদ্রবসৌ বিশ্বেদেবা এতানি বো গন্ধপুষ্পধূপদীপাচ্ছাদনানি নমঃ। ইতি উৎসৃজ্য এষ বো গন্ধঃ এতদ্বঃ পুষ্পং এষ বো ধূপঃ এষ বো দীপঃ এতদ্ব আচ্ছাদনমিতি প্রত্যেকং নিবেদয়েৎ। ততো দক্ষিণামুখঃ পাতিতবামজানুঃ প্রাচীনাবীতী পিতামহপক্ষে ওঁ অমুক গোত্র পিতামহামুক দেবশর্ম্মন্নমুক গোত্র প্রপিতামহামুক দেবশর্ম্মন্নমুক গোত্র বৃদ্ধপ্রপিতামহামুক দেবশর্ম্মন্নেতানি তে গন্ধপুষ্পধূপদীপাচ্ছাদনানি ওঁ যে চাত্র ত্বামনুযাংশ্চ ত্বমনু তস্মৈ তে স্বধা ইত্যুৎসৃজ্য এষ তে গন্ধঃ এতত্তে পুষ্পং এষ তে ধূপঃ এষ তে দীপঃ এতত্ত আচ্ছাদনমিতি প্রত্যেকং নিবেদয়েৎ। ততঃ প্রেতপক্ষে ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতানি তে গন্ধপুষ্পধূপদীপাচ্ছাদনানি স্বধেত্যুৎসৃজ্য এষ তে গন্ধঃ এতত্তে পুষ্পং এষ তে ধূপঃ এষ তে দীপঃ এতত্ত আচ্ছাদনম্ ইতি প্রত্যেকং নিবেদয়েৎ। ততো দৈবাদিক্রমেণ ব্রাহ্মণাগ্রস্থিতং কুশাদিকমমন্ত্রকমেবাপনীয় দৈবে ঐশানীমারভ্য প্রাগগ্রজলধারয়া দক্ষিণাবর্ত্তেন পিত্র্যে নৈঋতীমারভ্য দক্ষিণাগ্রজলধারয়া বামাবর্ত্তেন চতুষ্কোণ মণ্ডলং প্রেতপক্ষেঽপ্যেবং কৃত্বা সর্ব্বাণি ভোজনপাত্রাণি দৈবাদিক্রমেণ স্থাপয়িত্বা ৩৪১

যথা। ওঁ পিতৃভ্যঃ স্থানমসি। হে পাত্র নো ঽস্মাকং পিতৃভ্যঃ পিতৃপিতামহ প্রপিতামহাদীনাং স্থানং আধারোঽসি। পিতৃভ্য ইতি ষষ্ঠ্যর্থে চতুর্থী। অতঃ পিতৃভ্য ইতি

পিতৃপিতামহ প্রপিতামহাদীনামিতি যোজনীয়ম্। যতস্ত্বং পিতৃণাং স্থানং অতস্তেষাং অবস্থানং স্ব্যঙ্গীকৃতোঽসি ইতি ভাবঃ। ইদন্তু পিতৃণামাবরণম্। আবৃতাস্তত্র তিষ্ঠন্তু পিতরঃ শৌনকো হ্যব্রবীদিতি স্মৃতিঃ। (১২) তত উদ্ধৃত্য ঘৃতাক্তমন্নং পৃচ্ছত্যগ্নৌ করিষ্যামি ইতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ স্বাহা অগ্নয়ে কব্যবাহনায়। ওঁ স্বাহা সোমায় পিতৃমতে। অস্যার্থঃ। স্বাহা ইত্যাহুতিং দত্ত্বা সোমায় পিতৃমতে ইতি মন্ত্রশেষমুদীরয়েৎ। সোমমণ্ডলাকারত্বাৎ। অগ্নয়ে কিম্ভূতায় কব্যবাহনায় কব্যং পিতৃনামন্নং

সঘৃতমন্নমাদায় ওঁ অগ্নৌ করিষ্যামি ইতি ব্রাহ্মণং পৃচ্ছেৎ। ওঁ কুরুষেত্যুক্তে জলে ওঁ স্বাহেত্যাহুতিং দত্ত্বা ওঁ সোমায় পিতৃমতে ইতি মন্ত্রশেষং সমাপয়েৎ। ওঁ স্বাহেত্যপরাহুতিং দত্ত্বা ওঁ অগ্নয়ে কব্যবাহনায়েতি মন্ত্রশেষং সমাপয়েৎ [ ১২ ]। তূষ্ণীং বারদ্বয়ং দত্ত্বা হুতশেষং দৈবপাত্রে বারত্রয়ং পিতামহাদিপাত্রে বারত্রয়ং দত্ত্বা পিণ্ডার্থং কিঞ্চিৎ স্থাপয়েৎ। ততো দৈবেঽনুত্তানহস্তাভ্যাং পাত্রং ধৃত্বা ওঁ পৃথিবী তে পাত্রং দ্যৌঃ পিধানং ব্রাহ্মণস্য মুখে হ্যমৃতে হ্যমৃতং জুহোমি স্বাহা [ ১৩ ]। ইতি পঠেৎ। এবমনুত্তানহস্তাভ্যাং পিতামহাদিপাত্রং ধৃত্বা ওঁ পৃথিবী তে পাত্রমিতি পঠেৎ। ততো দৈবাদিক্রমেণান্নাদিকং পাত্রান্তরিতহস্তাভ্যাং পত্নী স্বয়ম্বা পরিবেশয়েৎ। উপকরণঞ্চ পাত্রান্তরে দত্ত্বা ভূমৌ স্থাপয়েৎ। পাত্রান্তরাসত্ত্বে ভোজনপাত্রে দদ্যাৎ। ন তু পাত্রান্তরে কৃত্বা





তদ্বহতীতি কব্যবাহনঃ তস্মৈ। ততো হুতশেষং দত্ত্বা (১৩) পাত্রমালভ্য জপেদিতি কাত্যায়নঃ। ওঁ পৃথিবী তে পাত্রং দ্যৌঃ পিধানং ব্রাহ্মণস্য মুখে হ্যমৃতে হ্যমৃতং জুহোমি স্বাহা। অস্যার্থঃ। হে অগ্নৌ করণহোমশেষ তে তব পাত্রমাধারঃ পৃথিবী বিশ্বাধারভূতা দ্যৌরাকাশং পিধানং আবরণমাচ্ছাদনং স্বামমৃতং হুতশেষং ব্রাহ্মণমুখে জুহোমি কিম্ভূতে মুখে অমৃতে অনষ্টে অভক্ষ্যভক্ষণাদিভিরপ্যদূষিতে। অত্র তে ইতি যুষ্মচ্ছব্দপ্রয়োগাদগ্নৌ করণবিশেষণং প্রাপ্যতে প্রকৃতত্বাৎ।

জুহোমি হোমপ্রদর্শনাৎ। স্বাহাপদোপাদানাৎ অব্যাহতম্। ব্রাহ্মণস্যাগ্নিতুল্যত্বেন তৎপাণৌ হোমঃ প্রযুক্তঃ দেবতাশ্চাত্র পিতরস্তথাচাপস্তম্বঃ। পিতরো হত্র দেবতা-ব্রাহ্মণশ্চাহবনীয়ার্থে ইত্যাদিনা ব্রাহ্মণস্যাগ্নিতুল্যত্বং পিতৄণাং দেবতাতুল্যত্বং প্রতিপাদিতবান্ (১৪) বৈষ্ণব্যর্চ্চাঃ যত্রাঙ্গুষ্ঠমন্নে অবগাহ্যেতি কাত্যায়নঃ। মন্ত্রো যথা। ওঁ ইদং বিষ্ণুর্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে। অস্যার্থঃ। বিষ্ণুর্ভগবান্ বিশ্বব্যাপিতয়া ইদমন্নং বিচক্রমে আক্রান্তবান্। কিঞ্চ বিষ্ণুরেব পদমস্মিন্নন্নে

পাত্রোপরিস্থাপয়েৎ। ততঃ প্রেতব্রাহ্মণপক্ষেঽন্নাদিকং পরিবেশয়েৎ। ততো দৈবপাত্রং বামহস্তেন ধৃত্বা সজলং কৃত্বা উত্তরামুখঃ পাতিত দক্ষিণজানুঃ উপবীতী ওঁ বিষ্ণো হব্যমিদং রক্ষস্বেত্যুক্ত্বা ওঁ ইদং বিষ্ণুর্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য পাংশুলে [ ১৪ ]। ইতি পঠিত্বান্নাদাবানখমঙ্গুষ্ঠং নিক্ষিপ্য ততো দৈবে তূষ্ণীং যবান্ বিকীর্য্য অন্নে মধু তদভাবে গুড়ং দত্ত্বা ব্রাহ্মণায় জলগণ্ডূষং দত্ত্বা গায়ত্রীং মধুবাতেতি পঠিত্বা মধু মধ্বিতি চ জপ্ত্বা বামহস্তেনান্নপাত্রং ধৃত্বা ওঁ পুরূরবো মাদ্রবসৌ বিশ্বেদেবা এতদ্বো ঽন্নং সোপকরণং নমঃ ইত্যুৎসৃজেৎ। ততঃ ইদমন্নং ইমা আপঃ ইদং হবিঃ এতান্যুপকরণানি যথাসুখং বাগ্যতো সদেতাং ইতি বদেৎ। ততো দক্ষিণামুখঃ পাতিত বামজানুঃ প্রাচীনাবীতী ওঁ বিষ্ণো কব্যং রক্ষস্বেত্যুক্ত্বা ইদং বিষ্ণুরিতি পঠিত্বান্নাদাবনখমঙ্গুষ্ঠং নিঃক্ষিপ্য ওঁ অপহতাসুরা-রক্ষাংসি বেদিষদ ইতি তিলান্ বিকীর্য্য [ ১৫ ]। অন্নে মধু তদভাবে গুড়ং দত্ত্বা ব্রাহ্মণায় জলগণ্ডূষং দত্ত্বা গায়ত্রীং মধুবাতেতি ১৩৩

নিদধে নিহিতবান্ কেন প্রকারেণ ত্রেধা ত্রিঃ প্রকারণম্। কুত্র পৃথিব্যাং আকাশে স্বর্গে চ অস্য বিষ্ণোঃ পদং যতো গতং অতঃ পাংশুলে পাংশুযুক্তে ভূদেশে সমূঢ়ং সমূহনং সম্যক্ নিবিষ্টং তদন্নং বাক্যার্থঃ। বিষ্ণুর্ভগবান্ ত্রিবিক্রমরূপেণ ঊর্দ্ধমধ্যাধো ব্যাপ্তস্তস্য পদং বিশেষতঃ পৃথিব্যাং নিবিষ্টং স বিষ্ণুরিদমন্নমাক্রান্তবান্ অতো রাক্ষসাদয়ো হত্রাপসরন্ত্বিত্যর্থঃ। (১৫) ততঃ যবান্ বিকীর্য্য অসুরানিরস্যন্তীতি কাত্যায়নঃ। মন্ত্রো যথা। অপহতাসুরারক্ষাংসি বেদিষদঃ। অস্যার্থঃ। অস্মিন

শ্রাদ্ধার্থমুপকল্পিতে অন্নে হে অসুরা অপহত অপহত অপগচ্ছত দূরীভবত ইত্যর্থঃ। কিন্তু তাস্তে বেদিষদঃ বেদ্যাং সীদন্তি তিষ্ঠন্তীতি শ্রাদ্ধার্থপরিষ্কৃতায়াং ভূমৌ যে বিঘ্নার্থমাগচ্ছন্তস্তে যূয়ং নিরস্তা ভবতেতি বাক্যার্থঃ। যজুর্ব্বেদে তু অপহতা অসুরা ইতি পাঠঃ তদেবং ব্যাখ্যানম্। যে শ্রাদ্ধবিঘ্নকারিণো হত্র শ্রাদ্ধার্থ-

ঋচং মধু মধ্বিতি চ জপ্ত্বা বামহস্তেনান্নপাত্রং ধৃত্বা ওঁ অমুক গোত্র পিতামহামুক দেবশর্ম্মন্নমুক গোত্র প্রপিতামহামুক দেবশর্ম্মন্নমুক গোত্র বৃদ্ধপ্রপিতামহামুক দেবশর্ম্মন্নেতত্তে হন্নং সোপকরণং সতিলোদকং ওঁ যে চাত্র ত্বামনুযাংশ্চ ত্বমনু তস্মৈ তে স্বধেত্যুৎসৃজেৎ। ততঃ ইদমন্নং ইমা আপঃ ইদং হবিঃ এতান্যুপকরণানি যথাসুখং বাগ্‌যতাঃ স্বদত ইতি ব্রূয়াৎ। ততঃ প্রেতপক্ষে পূর্ব্ববৎ ইদং বিষ্ণু-রিত্যাদি মধুজপান্তং কৃত্বা বামহস্তেনান্নপাত্রং ধৃত্বা ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তে হন্নং সোপকরণং স্বধেত্যুৎসৃজেৎ। তত ইদমন্নং ইমা আপঃ ইদং হবিঃ এতান্যুপকরণানি যথাসুখং বাগ্‌যতঃ স্বদ ইতি ব্রূয়াৎ। ততো দৈবাদিক্রমেণ প্রত্যেকং জল-গণ্ডূষং দত্ত্বা গায়ত্রীং ত্রিঃ সকৃদ্বা মধুবাতেতি ঋচং ওঁ অন্নহীনং ক্রিয়াহীনং বিধিহীনঞ্চ যদ্ভবেৎ। তৎসর্ব্বমচ্ছিদ্রমস্তু ইতি পঠিত্বা শ্রব্যং পঠেৎ। তদ্যথা সপ্রণব ব্যাহৃতিকাং গায়ত্রীং মধুবাতেতি পঠিত্বা ওঁ যজ্ঞেশ্বর ইতি। যোগীশ্বরমিত্যাদি যাজ্ঞবল্ক্যোক্ত শ্লোকত্রয়ং। ওঁ তদ্বিষ্ণোরিতি দুর্য্যোধন ইতি। যুধিষ্ঠির ইতি। ওঁ সপ্তব্যাধা ইতি চ পঠেৎ। ততো দক্ষিণাগ্রান্ কুশানাস্তীর্য্য সতিল-জলেন তান্ প্রোক্ষ্য সর্ব্বপ্রকারমন্নমুদ্ধৃত্য বারিণাপ্লুত্য ওঁ অগ্নিদগ্ধাশ্চ যে জীবা যেঽপ্যদগ্ধাঃ কুলে মম। ভূমৌ দত্তেন তৃপ্যন্তু তৃপ্তা যান্তু পরাং গতিম্। ওঁ যেষাং ন মাতা ন পিতা ন বন্ধুর্নৈবান্নসিদ্ধির্ন তথান্নমস্তি তত্তৃপ্তয়ে হন্নং ভুবি দত্তমেতৎ প্রয়ান্তু লোকায় ৩৪৫

মুপকল্পিতে হন্নে অসুরাস্তে অপহতা অপসারিতা দূরীভূতা হত্যর্থঃ। (১৬) ততস্তৃপ্তিং জ্ঞাত্বান্নং বিকীরেৎ ইতি কাত্যায়নঃ। মন্ত্রস্তু পৌরাণিক এব। ওঁ

অগ্নিদগ্ধাশ্চ যে জীবা যেঽপ্যদগ্ধাঃ কুলে মম ভূমৌ দত্তেন তৃপ্যন্তু তৃপ্তা যান্তু পরাং গতিম্। ওঁ যেষাং ন মাতা ন পিতা ন বন্ধুর্নৈবান্নসিদ্ধির্ন তথান্নমস্তি তত্তৃপ্তয়েঽন্নং ভুবি দত্তমেতৎ প্রয়ান্তু লোকায় সুখায় তদ্বৎ। অস্যার্থঃ। মম কুলে বংশে যে জীবাঃ প্রাণিনোঽগ্নিদগ্ধা লৌকিকাগ্নিনা যেন কেনাপি দগ্ধা এব পিণ্ডোদকভাজো ন ভূতাস্তথাপি যে দুর্ভিক্ষমরণেঽদগ্ধা দাহমেব ন লভন্তু তে জীবা মামকা মদ্দত্তেন বিকীরণান্নেন তৃপ্যন্তু তৃপ্তাঃ সন্তঃ পরাং গতিং উৎকৃষ্ট স্থানং

সুখায় তদ্বৎ ইতি মন্ত্রাভ্যাং তদুক্তফলমুদ্দিশ্য দক্ষিণাগ্র কুশোপরি বিকীরেৎ। ততো হস্তৌ প্রক্ষাল্যাচম্য বিষ্ণুং স্মৃত্বা ব্রাহ্মণেভ্যঃ প্রত্যেকং জলগণ্ডূষং দত্ত্বা পূর্ব্ববদ্গায়ত্রীং মধুবাতেতি ঋচং মধু মধ্বিতি চ জপ্ত্বা। (ওঁ তৃপ্তাঃ স্থ ইতি পৃচ্ছেৎ ওঁ তৃপ্তাঃ স্ম ইতি তৈরুক্তে) ওঁ শেষমন্নং ক্ব দেয়মিতি পৃচ্ছেৎ। ওঁ ইষ্টেভ্যো যথাসুখং বিনিযুজ্যতামিতি তৈরুক্তে ওঁ পিণ্ডদানমহং করিষ্যে, ইতি পৃচ্ছেৎ। ওঁ কুরুষ্বেতি প্রতিবচনম্। ততঃ পিতামহাদি ব্রাহ্মণাগ্রত ওঁ নিহন্মি সর্ব্বং যদমেধ্যবদ্ভবেদ্ধতাশ্চ সর্ব্বে হসুরদানবা ময়া রক্ষাংসি যক্ষাঃ সপিশাচসংঘা হতা ময়া যাতুধানাশ্চ সর্ব্বে ইত্যনেন নৈর্ঋতীমারভ্য বামাবর্ত্তেন 

প্রয়ান্তু গচ্ছন্তু। তথা যেষাং জীবানাং মাতৃপিতৃপ্রভৃতয়ো বান্ধবা ন বিদ্যন্তে শ্রাদ্ধদায়িনস্তেষামপি তৃপ্তয়ে ভুবি ভূমৌ অন্নং দত্তং ময়েতি শেষঃ। তেনান্নেন তৃপ্তাঃ সন্তঃ সুখায় লোকায় স্বর্গাখ্যায় প্রয়ান্তু গচ্ছন্তু। গত্যর্থকর্ম্মণীতি কর্ম্মণি চতুর্থী। বিকীরণানন্তরং ভূমৌ রেখাং কুর্য্যাৎ ইতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ নিহন্মি সর্ব্বং যদমেধ্যবস্তুবেদ্ধতাশ্চ সর্ব্বে হসুরদানবা ময়া। রক্ষাংসি যক্ষাঃ সপিশাচসঙ্ঘা হতা ময়া যাতুধানাশ্চ সর্ব্বে। অস্যার্থঃ। তস্মিন্ প্রকৃতে কর্ম্মণি যদমেধ্যবৎ বদপবিত্রভূতং অবিহিতাচরণাচারাদিরূপেণ যদশাস্ত্ররূপং তন্নিহন্মি নিরস্যামি। তথা যদত্রাসুরদানবাদয়ো বিঘ্নকারিণস্তেঽপি হতা নিরস্তাঃ সর্ব্ব এব অতস্তেষামজ্ঞানবশাদ্

ইত্যভিপ্রায়। রেখোপরি কুশানাস্তীর্য্যাবনেজয়েদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ অমুক গোত্র পিতরমুক দেবশর্ম্মন্নবনেনিক্ষ্ব ওঁ যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে স্বধেতি গোভিলোক্তঃ। অস্যার্থঃ। হে পিতস্ত্বমবনেনিক্ষ্ব মদ্দত্তেন তোয়েন শুদ্ধো ভব। ন কেবলং ত্বমেব কিন্ত্বন্যেঽপি যে হত্র শ্রাদ্ধকর্ম্মণি ত্বামনু তব



দক্ষিণাগ্রজলধারয়া চতুষ্কোণ মণ্ডলং কৃত্বা প্রাদেশমাত্রং সাগ্রকুশপত্রদ্বয়ং বামহস্তাদ্দক্ষিণহস্তেন গৃহীত্বা ওঁ অপহতা নিহন্মি ভ্যাং মধ্যস্থানে দক্ষিণাগ্রাং রেখাং কুর্য্যাৎ। তৎকুশপত্রদ্বয়মৈশান্যাং দিশি ক্ষিপেৎ। ততঃ প্রেতপক্ষে তাদৃশং চতুষ্কোণ মণ্ডলং কৃত্বা পূর্ব্ববদ্রেখাং কুর্য্যাৎ। ততঃ পিতামহাদিপক্ষে রেখোপরি সমূলান্ সাগ্রান্ দর্ভানাস্তীর্য্য প্রেতব্রাহ্মণপক্ষেঽপি তাদৃশান্ দর্ভানাস্তীর্য্য ওঁ দেবতাভ্য ইতি ত্রিঃ পঠেৎ। ততঃ পিতামহাদি পক্ষে ওঁ এত পিতরঃ সৌম্যাস ইতি মন্ত্রেণ পিতৄনাবা-হয়েৎ তিলাংশ্চাস্তীর্ণকুশেষু বিকীরেৎ। ততঃ প্রেতপক্ষে ওঁ এহি প্রেত সৌম্য গম্ভীরেভিঃ পথিভিঃ পূর্ব্বিণেভির্দ্দেহ্যস্মভ্যং 
দ্রবিণেহ ভদ্রং রয়িঞ্চ নঃ সর্ব্ববীরং নিযচ্ছ ইত্যাবাহ্য তিলান্ বিকীরেৎ। ততঃ সতিলজলং গৃহীত্বা ওঁ অমুক গোত্র পিতামহা-মুক দেবশর্ম্মন্নবনেনিক্ষ্ব ওঁ যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে স্বধেতি কুশমূলে দদ্যাৎ। এবং জলস্পর্শ পূর্ব্বকং প্রপিতা-মহ বৃদ্ধপ্রপিতামহয়োরপি। ততঃ প্রেতপক্ষে ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নবনেনিক্ষ্ব স্বধেতি দদ্যাৎ। ততো হস্তৌ-করণশেষং শ্রাদ্ধশেষং ব্যঞ্জনাদিকঞ্চ তিলমধ্বাজ্যযুক্তমেকস্মিন্ পাত্রে পিণ্ডত্রয়ং নির্ম্মায় ঘৃতমধ্বভিঘারিতং কৃত্বা বামহস্তগৃহীত

পশ্চাত্তোক্তারস্তথা যাংশ্চ ত্বমনু যেষাং ত্বং পশ্চাদ্ভোক্তাসি। তস্মৈ ভবানুযায়িনে তুভ্যং স্বধা। তস্মৈ ইতি বহুবচনে একবচনং তেভ্য ইত্যর্থঃ। ততো মধুবাতেতি

মন্ত্রিতং মধু দদ্যাদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ মধুবাতা ঋতায়তে মধু ক্ষরন্তু সিন্ধবঃ ওঁ মাধ্বীর্নঃ সন্ত্বোষধীর্মধু নক্তমুতোষসো মধুমৎ পার্থিবং রজঃ ওঁ মধু দ্যৌরস্তু নঃ পিতা মধুমান্নো বনস্পতির্মধুমাংস্তু সূর্য্যো মাধ্বীর্গাবো ভবন্তু নঃ। অস্যার্থঃ। মধুদানেন তৃপ্তা পিতরো হবিলপন্তি বাতা একোনপঞ্চাশৎ মধু ঋতায়াতে মধু বহন্তু মধুদা ভবন্তু। তথা সিন্ধবো নদ্যঃ মধু ক্ষরন্তু স্রবন্তু। তথা নো হস্মাকং ওষধীরোষধ্যো ধান্যাদয়ো মাধ্বীঃ সন্তু মধুফলা ভবন্তু ইত্যর্থঃ। তথা নক্তং রাত্রয়ো মধুরূপা ভবন্তু। তথা উষসঃ কালবিশেষাঃ মধুযুক্তা ভবন্তু। তথা পার্থিবং রজো ধূলয়ঃ পৃথিবীসম্বন্ধানি রজাংসি মধুমন্তি ভবন্তু। তথা দ্যৌরাকাশং মধু অস্তু অধিষ্ঠান রূপেণ মধুময়ং ভবতু। ক্বচিৎ দ্যৌঃ স্বর্গঃ পিতেব সর্ব্বস্যাধিগম্যত্বাদিতি পিতৃপদ বিশেষণং কৃতম্। তথা নো হস্মাকং পিতা মধুমানস্তু ভবতু। তথা নো হস্মাকং বনস্পতিরুদ্যানতরবো মধুফলা ভবন্তু। তথা

পাত্রাদ্দক্ষিণহস্তেন গৃহীত্বা ওঁ মধুবাতা ইতি ঋক্‌ত্রয়ং মধু মধু মধ্বিতিচ ওঁ অক্ষন্নমীতি চ পঠিত্বা প্রথমাস্তীর্ণ কুশমূলে অবনে- জনস্থানে ওঁ অমুক গোত্র পিতামহামুক দেবশর্ম্মন্নেষ তে পিণ্ডঃ ওঁ যে চাত্র ত্বামনু যাংশ্চ ত্বমনু তস্মৈ তে স্বধেতি দদ্যাৎ। এবং জলস্পর্শ পূর্ব্বকং প্রপিতামহবৃদ্ধপ্রপিতামহয়োঃ পিণ্ডদানং কুর্ব্বীত। ততঃ হস্তলেপশ্চাস্তীর্ণ কুশমূলে ওঁ লেপভুজঃ পিতরঃ প্রীয়ন্তামিতি নিমৃষ্য দদ্যাৎ। তত আচম্য হরিং স্মরেৎ। ততঃ প্রেতপিণ্ডং নির্ম্মায় মধ্বভিঘারিতং কৃত্বা বামহস্তগৃহীত পাত্রা- দ্দক্ষিণহস্তেন পিণ্ডং গৃহীত্বা মধুবাতেত্যাদি ঋক্‌ত্রয়ং মধু মধু মধ্বিতিচ ওঁ অক্ষন্নমীতি চ মন্ত্রং পঠিত্বা ওঁ অমুক গোত্র প্রেতামুক ৩৪৭

সূর্য্যো জগদেকসাক্ষী মধুময়ো ভবতু পূর্ব্ববদর্থসঙ্গতত্বাৎ অন্তেরাদিলোপঃ। তথা নো হস্মাকং গাবো মাধ্বীঃ মধুক্ষীরিণ্যো ভবন্তু ইত্যাশংসাবাক্যার্থঃ। ঋতায়ত ইতি ঋত- শব্দাদায় প্রত্যয়ে তিঙাং তিঙিতি বহুবচনে একবচনং। মাধ্বীরিতি বিভক্তিব্যত্যয়ে প্রথমায়াং দ্বিতীয়া এবমোষধীরিত্যত্রাপি। উষসশ্ছান্দসত্বান্ন নুনাগমঃ। অবনেজনে পিণ্ডান্নিনয়েদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ অক্ষন্নমীমদন্ত হ্যব প্রিয়া অধূষত অস্তোষত স্বভানবো বিপ্রান বিষ্ঠয়া মতীয়ো যোজান্বিন্দ্রতে হরী। অস্যার্থঃ। হে হরে হে ইন্দ্র যান্ বিপ্রান্ যে শ্রাদ্ধভোক্তারো বিপ্রা মদ্দত্তেনান্নপানীয়েনামীমদন্ত মুদমত্যর্থং প্রাপ্য হর্ষযুক্তা বভূবুস্তথা অস্তোষত যে তুষ্টা ভূতাস্তথা অক্ষন্ যে সংহতা একীভূতাস্তান

বিপ্রান্ অব পালয়। যি যস্মাৎ তে তব প্রিয়া বল্লভাঃ ব্রাহ্মণা মামকী তনুরিতি শ্রুত্যৈবোক্তত্বাৎ তত্র তে বিপ্রাস্তবৈব আশ্রয়ামাধুযত নাবকম্পন্ত। কিম্ভূতাস্তে বিপ্রাঃ স্বভানবঃ সুপ্রকাশশীলাঃ সুপ্রদীপকা ইতি যাবৎ। উ অবধারণে স্থ বিতর্কে। বিপ্রাঃ পুনঃ কীদৃশা বিষ্ঠয়া মতীয়া ঊর্দ্ধগামিন্যা মত্যা বিশিষ্টা বিষ্ঠেতি বি শব্দো হুত্তরীক্ষেঽপি বৌ তিষ্ঠতি গচ্ছতি বা বিষ্ঠা ছান্দসত্বাৎ ষত্বম্। অতস্তর্কয়ামি সুপ্রকাশবত ইতি ছান্দসত্বাৎ। মত্যা ইত্যর্থে মতীয়া যকারাগমঃ ছান্দসত্বাৎ। হরীতি সম্বোধনপদং সমুদ্ধাবীদিতি ঈকারঃ। ইন্দ্র ইতি হরিবিশেষণং পরমেশ্বরত্বাৎ। অবিদ্যাং কার্য্যো হরতীতি হরিরিতি অন্বয়াৎ। যানিতি বিভক্তিব্যত্যয়েন প্রথমায়াং দ্বিতীয়া। পূর্ব্ববৎ

দেবশর্ম্মন্নেষ তে পিণ্ডঃ স্বধেতি দদ্যাৎ। ততঃ করৌ প্রক্ষাল্যাচম্য হরিং স্মৃত্বা পিতামহাদিপক্ষে পিণ্ডপাত্রং প্রক্ষাল্য তৎপাত্রং বামহস্তা-দ্দক্ষিণহস্তেন গৃহীত্বা পাত্রপ্রক্ষালনজলেন প্রথমবৎ পিণ্ডানবনেজয়েৎ। ততঃ প্রেতপক্ষে পাত্রং প্রক্ষাল্য প্রথমবদবনেজয়েৎ। ততঃ পিতামহাদি পক্ষে ওঁ অত্র পিতরো মাদয়ধ্বং যথাভাগমা বৃষায়ধ্বমিতি জপেৎ। ততঃ কৃতাঞ্জলির্বামাবর্ত্তেনোদঙ্মুখো ভূত্বা শ্বাসিপর্য্যন্তং শ্বাসং ধৃত্বা তেনৈব পথা পরাবর্ত্তমানঃ সর্ব্বান্ পিতৄন্ তুষ্টান্ ভাস্করমূর্ত্তিকান্ ধ্যায়ন্ ওঁ অমীমদন্তঃ পিতরো যথা ভাগমা-বৃষায়িষত। ইতি জপেৎ। ততঃ প্রেতপক্ষে অত্র প্রেত মাদয়স্ব যথা ভাগমাবৃষায়স্ব। ইতি জপেৎ। ততঃ কৃতাঞ্জলিঃ ওঁ নমো বঃ পিতরঃ পিতরো নমো বঃ। ইতি জপেৎ। ওঁ গৃহান্নঃ পিতরো দত্ত ইতি গৃহিণীং পশ্যেৎ। সদো বঃ পিতরো দেষ্ম ইতি পিণ্ডং পশ্যেৎ। ততো নবমনবস্থা শুক্লবস্ত্র দশাভবং সূত্রং বামহস্তাদ্দক্ষিণহস্তেন গৃহীত্বা ওঁ এতদ্বঃ পিতরো বাসঃ। ইতি তেনায়মর্থঃ। যে বিপ্রা অত্র কর্ম্মণি ভোক্তারস্তান্ বিপ্রান্ অব ইত্যর্থঃ। অক্ষন্নিতি ছান্দসত্বাদড়াগমবাধঃ। মতীয়া উ যান্ ইত্যর্থে মতীযো যান্বিষ্ঠ ইতি ব্যুৎপত্তিঃ। যত্তদোরভিসম্বন্ধনিয়মাৎ যচ্ছব্দপ্রয়োগে তানিত্যধ্যাহার্য্যম্। পিণ্ডদানানন্তরং অত্র পিতর ইতি জপেদিতি কাত্যায়নঃ। মন্ত্রস্তু। অত্র পিতরো মাদয়ধ্বং অপ ইতি স্মার্ত্তাঃ। যথাভাগমাবৃষায়ধ্বং। হে পিতরঃ অত্র পিণ্ডে মাদয়ধ্বং হর্ষযুক্তা ভবত। ন কেবলং মাদয়ধ্বং কিন্তু যথাভাগং স্বং স্বং ভাগং প্রাপ্য আবৃ-

বাদরথং বৃষা ইব বলিনো ভব। অত্রেবামীমদন্তঃ পিতরো যথাভাগমাবৃষায়িত। পিতরো হ্মীমদন্ত মোদং প্রাপ্তা যদ্দত্তেন পিণ্ডেন হর্ষযুক্তা ভূতা ইত্যযথেতি ব্যাখ্যাতম্। ইব বলিনো বৃষশব্দাৎ কাঙ্ লোট্। বসন্তায় নমস্ত পিণ্ডপূজানন্তরমিতি স্মার্ত্তাঃ। ততঃ পরাবৃত্য নমো ব ইতি জপেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ নমো বঃ পিতরো পিতরোঃ নমো বঃ। ওঁ গৃহান্নঃ পিতরো দত্ত। ওঁ সদো বঃ পিতরো দেষ্মঃ। অস্যার্থঃ। হে পিতরঃ বো যুষ্মভ্যং নমো হস্তু ভক্তিশ্রদ্ধাতি-শয়েন পুনঃ পুনর্নমস্কারো হস্ত্বিতি পুনরুক্তিঃ। নমস্কারাদিনা প্রীতাঃ সন্তঃ পিতরো নো হস্মভ্যং গৃহানস্মৎকুলদারান্ অত্র চ গৃহিণী গৃহমুচ্যতে ইতি গৃহিণীপ্রার্থনম্। দত্ত প্রযচ্ছত। বয়ং বো যুষ্মভ্যং পুত্রাদ্যাৎপত্তিরূপেণ সদঃ সত্তাস্থানং দেষ্মঃ দদামঃ। ছান্দসত্বাৎ দিশেৰ্দ্বিকরণলোপঃ দীর্ঘাভাবো গুণশ্চোপধায়াঃ। তদনন্তরং সব্যে

পঠিত্বা ওঁ অমুক গোত্র পিতামহামুক দেবশর্ম্মন্নেতত্তে বাসো যে চাত্রেতি দদ্যাৎ। এবং প্রপিতামহবৃদ্ধপ্রপিতামহয়োরপি। ততঃ পিতামহাদি পিণ্ডান্ পূজয়েৎ। ততঃ প্রেতপক্ষে বামাবর্ত্তেনোদঙ্মুখো ভূত্বা আগমনাচ্ছ্বাসং ধৃত্বা তেনৈব পথা পরাবর্ত্তমানঃ সর্ব্বান্ প্রেতান্ ভাস্বরমূর্ত্তিকান্ ধ্যায়ন্। ওঁ অমীমদৎ প্রেত যথা ভাগমাবৃষায়িষ্ট। ইতি দক্ষিণামুখো জপেৎ। নমস্তে প্রেত প্রেত নমস্তে ইতি কৃতাঞ্জলির্জপেৎ। ওঁ গৃহান্নঃ প্রেত দেহি ইতি গৃহিণীং পশ্যেৎ ওঁ সদস্তে প্রেত দেষ্ম ইতি পিণ্ডং পশ্যেৎ। ততো নবমনবয়া শুক্লবস্ত্রদশাভবং সূত্রং বামহস্তাদ্দক্ষিণহস্তেন গৃহীত্বা ওঁ এতদ্বঃ প্রেতা বাসঃ। ইতি পঠিত্বা ওঁ অমুক গোত্র প্রেতামুক

পরাবৃত্য বসন্তায় ইতি জপেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ বসন্তায় নমস্তুভ্যং গ্রীষ্মায় চ নমো নমঃ। বর্ষাভ্যশ্চ শরৎসংজ্ঞ ঋতবে চ নমঃ সদা। হেমন্তায় নমস্তুভ্যং নমস্তে শিশিরায় চ। মাসসংবৎসরেভ্যশ্চ দিবসেভ্যো নমো নমঃ। অস্যার্থঃ বসন্তো জগদাহ্লাদক ঋতুবিশেষঃ। তং প্রত্যক্ষীকৃত্য স্তৌতি তুভ্যং নমঃ। তথা গ্রীষ্মঃ শোষক এব ঋতুস্তস্মৈ নমঃ। তথা বর্ষাঃ সর্ব্বজনানাং শস্যোৎপাদকত্বেন স্থিতিকারকঋতুবিশেষস্তাভ্যো নমঃ। তথা শরদপি মনোহারী ঋতুস্তস্মৈ নমঃ। তথা হেমন্তঃ শৈত্যসম্বন্ধিহেতুভূতসুখাবহঋতুস্তস্মৈ নঃ। তথা শিশিরোঽপি নমো হস্তুকুলসুখসম্পাদক ঋতুস্তস্মৈ নমঃ। তথা দ্বাদশমাসাঃ সম্বৎসরাদিবর্ষাশ্চ স্বীয়স্বীয় প্রয়োজনকত্বেন

নমস্যা স্তেভ্যো নম ইতি শ্রাদ্ধকর্ত্তুঃ পিতৃণাং ঋতুবিহিতশ্রাদ্ধদানেনাতিশয় প্রীতিজনকত্বাৎ ঋতুভ্যো নমস্কারেণানতিরিক্তার্থঃ। যজুর্ব্বেদিনামপি ষড়ঞ্জলিদানং প্রসঙ্গাল্লিখিতম্। ওঁ নমো বঃ পিতরঃ শুষ্মায় নমো বঃ পিতরস্তপসে নমো বঃ পিতরো যজ্জীবং তস্মৈ নমো বঃ পিতরো রসায়। নমো বঃ পিতরো ঘোরায় মন্যবে। ওঁ স্বধায়ৈ পিতরো নমঃ। এষামন্ত্রমর্থঃ। হে পিতরো বো যুষ্মভ্যং নমঃ। শুষ্মায় চ নমঃ। শুষশোষণে ইতি শুষের্ম্ম ইমি মপ্রত্যয়ঃ। শুষ্মায় শোষণকারিণে গ্রীষ্মায় ইত্যর্থঃ। তথা হে পিতরো বো যুষ্মভ্যং নমঃ তপসে শিশিরায় ঋতবে চ। তপ ইতি মাঘ মাসস্য নাম। তপা মাঘে ২থ ফাল্গুনে ইত্যমরঃ। তপধূপ সন্তাপে শিশিরেণ লোকাংস্তাপয়তি তাপয়তে রশ্মিন্ ছান্দসত্বাৎ ত্বস্য ইলোপশ্চ। হে পিতরো বো যুষ্মভ্যং নমঃ। যজ্জীবং জলং তস্মৈ নমঃ। জীবন-

দেবশর্ম্মন্নেতত্তেবাসঃ স্বধেত্যুৎসৃজ্য প্রেতপিণ্ডে দদ্যাৎ। (ততঃ ওঁ উর্জ্জং বহন্তীরিত্যনেন পিণ্ডং সিঞ্চেৎ ইতি কস্যচিন্মতং) ততঃ পিণ্ডং গন্ধাদিনা সংপূজ্য সূত্রাগন্ধাদীননপমার্য্য ওঁ যে সমানাঃ সমনসঃ পিতরো যমরাজ্যে তেষাং লোকঃ স্বধা নমো যজ্ঞো দেবেষু কল্পতাম্। ওঁ যে সমানাঃ সমনসো জীবা জীবেষু মামকাঃ তেষাং শ্রীর্ম্ময়ি কল্পতামস্মিন্ লোকে শতং সমাঃ। ইতি মন্ত্রাভ্যাং সুবর্ণরজতকুশৈশ্ছেদদ্বয়েন সমাংশেন প্রেতপিণ্ডং খণ্ডত্রয়ং কৃত্বা আদ্যখণ্ডং পিতামহপিণ্ড মধ্যে স্থাপয়িত্বা ওঁ যে সমানা ইত্যাদি মন্ত্রদ্বয়েন মিশ্রয়িত্বা সুবর্ত্তুলং কৃত্বা তত্রৈব স্থাপয়েৎ এবং মধ্যখণ্ডং প্রপিতামহপিণ্ডে পূর্ব্ববন্মন্ত্রাভ্যাং মিশ্রয়েৎ এবং তৃতীয় ৩৫.

ত্বেন জলমুচ্যতে জলেন বর্ষাঃ সংবুধ্যন্তে অতো বর্ষাভ্যো নমঃ। তথা হে পিতরো বো নমঃ। রসায় নমঃ রসঃ পুষ্পরসঃ। বসন্তায় নমঃ তদোগাত্তদ্বত্যতিদেশ ইতি রসশব্দেন বসন্ত উচ্যতে। তথা হে পিতরো বো নমঃ। ঘোরায় মন্যবে নমঃ। হেমন্তায় নম ইত্যর্থঃ। হেমন্তঃ খলু শীতলপ্রকৃত্যা প্রাণিনাং ভয়হেতুর্ভবতি অতো ঘোরঃ। মন্যুশ্চ দুঃখজনকত্বাৎ মন্যবে ক্রুদ্ধায়। যথা কশ্চিৎ দুঃখং জনয়তি তথা অয়মপি শীতলজনকত্বাৎ দুঃখমুৎপাদয়তি। তথা হে পিতরো নমঃ স্বধায়ৈ শরদে নমঃ। তথা চ শ্রুতিঃ। স্বধা বৈ শরৎ স্বধা বৈ পিতৃণামন্নমিতি তদেতৈঃ ষড়্ভিঃ ঋতুনমস্কারৈঃ পিতরস্তৃপ্তা ভবন্তি ঋতবশ্চেতি তাৎপর্য্যম্।

অথ পিণ্ডাগ্রভূমিমাসিঞ্চেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ সুসংপ্রোক্ষিতমস্তু। অস্যার্থঃ। ইদং পিণ্ডমমী পস্থানং সুসংপ্রোক্ষিতং অতিশয়েন প্রোক্ষিতং ভবতু ইত্যাশংসা। তথা শিবা আপঃ সন্তু। অস্যার্থঃ। এতা আপঃ শ্রাদ্ধকর্ম্মণি নিযুক্তাঃ শিবাঃ কল্যাণপ্রদাঃ সন্তু ইত্যাশংসা। তথা সৌমনস্যমস্তু।



খণ্ডং বৃদ্ধপ্রপিতামহপিণ্ডে ওঁ যে সমানা ইতি মন্ত্রাভ্যাং মিশ্রয়িত্বা সুবর্ত্তুলং কৃত্বা তত্রৈব স্থাপয়েৎ। ততস্তান্ সুবর্ত্তুলান্ পিণ্ডান্ গন্ধা-দিনা সংপূজ্য কৃতাঞ্জলিঃ। ওঁ বসন্তায় নমস্তুভ্যং গ্রীষ্মায় চ নমো নমঃ। বর্ষাভ্যশ্চ শরৎসংজ্ঞ ঋতবে চ নমঃ সদা। ওঁ হেমন্তায় নম-স্তুভ্যং নমস্তে শিশিরায় চ। মাসসম্বৎসরেভ্যশ্চ দিবসেভ্যো নমো নমঃ। ইত্যনেন পিতৃরূপান্ ষড়ৃতূন্নমস্কুর্য্যাৎ। এবং প্রেতপক্ষে চ তত ওঁ সুসংপ্রোক্ষিতমস্তু ইতি ত্রাণাগ্রভূমিমাসিঞ্চেৎ। পক্ষত্রয়ে ইতি বিশেষঃ। ওঁ অস্ত্বিত্যুত্তরম্। ততো দৈবাদিক্রমেণ ব্রাহ্মণ হস্তে ওঁ শিবা আপঃ সন্তু ইতি প্রত্যেকং জলং দদ্যাৎ। ওঁ সন্ত্বিতি প্রতিবচনম্। ওঁ সৌমনস্যমস্তু ইতি পুষ্পং। ওঁ অস্ত্বিতি প্রতিবচনম্। ওঁ অক্ষতঞ্চারিষ্টমস্তু যবান্ বিকীরেৎ। ওঁ অস্ত্বিতি প্রতিবচনম্। ততঃ প্রেতব্রাহ্মণপক্ষে এবং দত্ত্বা ততঃ পিতামহ পক্ষে তিলাজ্যমধুসংযুক্তং জলং গৃহীত্বা ওঁ অমুক গোত্রস্য পিতামহস্যামুক দেবশর্ম্মণো দত্তমিদমন্ন পানাদিকমক্ষয্যমস্তু ইতি পিতামহ ব্রাহ্মণহস্তে দদ্যাৎ। ওঁ অস্ত্বিতি প্রতিবচনম্। এবং প্রপিতামহ বৃদ্ধপ্রপিতামহয়োরপি। ততঃ প্রেতপক্ষে তাদৃশং জলং গৃহীত্বা ওঁ অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো দত্তমিদমন্নপানাদিকমুপতিষ্ঠতামিতি প্রেতব্রাহ্মণহস্তে জলং দদ্যাৎ। ওঁ উপতিষ্ঠতামিতি প্রত্যু-ত্তরম্। ততঃ পিতামহাদিপক্ষে ওঁ অঘোরাঃ পিতরঃ সন্তু ইতি পৃচ্ছেৎ। ওঁ সন্ত্বিতি প্রতিবচনম্। ওঁ গোত্রং নো বর্দ্ধতা-



অস্যার্থঃ। সুমনসো ভাবঃ সৌমনস্যং যদত্র শ্রাদ্ধে দত্তং পুষ্পং সৌমনস্যং সুমনসঃ প্রসাদকং ভবতু। তথা অক্ষতঞ্চারিষ্টমস্তু। অস্যার্থঃ। অক্ষতং যবা ইদমক্ষতমরিষ্টং শ্রাদ্ধবিঘ্নকারিণং নিরাশয়িতুমস্তু ভবতু। ততো হক্ষয্যদানানন্তরম্। অঘোরা ইতি জপেদিতি কাত্যায়নঃ। মন্ত্রো যথা। অঘোরাঃ পিতরঃ সন্তু।

অস্যার্থঃ। মম পিতরঃ পিতৃপিতামহ প্রপিতামহ প্রভৃতয়ঃ অঘোরা অভয়প্রদাঃ সন্তু ভবন্তু। (২৯) গোত্রং নো বর্দ্ধতাম্। তেষাং শ্রাদ্ধদানেনাতিশয় প্রীতিজনকত্বাৎ স্বগোত্রং সন্ততিং পুত্রপৌত্রাদিরূপাং বর্দ্ধতামিত্যাশংসা। ততো শক্ষয্যদানানন্তরং পিণ্ডে পবিত্রসম্বন্ধান্ কুশানাস্তীর্য্য পৃচ্ছেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ স্বধাং বাচ-

মিতি পৃচ্ছেৎ। ওঁ বর্দ্ধতামিতি প্রত্যুত্তরম্। ততঃ প্রেতপক্ষে ওঁ অঘোরঃ প্রেতো হস্তু ওঁ অস্ত্বিতি প্রতি বচনং। ততঃ পিতামহপক্ষে পিণ্ডানানুপরি সপবিত্র কুশানাস্তীর্য্য ওঁ নমঃ স্বধাং বাচয়িষ্যে [৩০]। ইতি পৃচ্ছেৎ। ওঁ বাচ্যতামিত্য-নুজ্ঞাতঃ। ওঁ পিতামহেভ্যঃ স্বধোচ্যতাং ওঁ প্রপিতামহেভ্যঃ স্বধোচ্যতাং ওঁ বৃদ্ধপ্রপিতামহেভ্যঃ স্বধোচ্যতাম্। ওঁ অস্তু স্বধেতি ব্রাহ্মণৈরুক্তে সপবিত্র কুশসহিত পিণ্ডোপরি বারিধারয়া ওঁ ঊর্জ্জং বহন্তীরমৃতং ঘৃতং পয়ঃ কীলালং পরিস্রুতং স্বধা স্থ তর্পয়ত মে পিতৄন্ [৩১]। ইতি সিঞ্চেৎ। প্রেতপক্ষে পিতৄনিত্যত্র প্রেতমিত্যূহেন সিঞ্চেৎ। ততঃ পিতামহপক্ষে ৩৫২
ন্যুব্জীকৃতং পাত্রমুত্তানীকৃত্য দক্ষিণাং দদ্যাৎ। যথা পিতামহপক্ষে ওঁ অদ্যেত্যাদি অমুক গোত্রস্য পিতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য প্রপিতামহস্যামুক দেবশর্ম্মণঃ অমুক গোত্রস্য বৃদ্ধপ্রপিতামহস্যামুক দেবশর্ম্মণঃ কৃতৈতৎ সপিণ্ডীকরণ শ্রাদ্ধকর্ম্মণঃ প্রতি-ষ্ঠার্থং দক্ষিণামিদং রজতং চন্দ্রদৈবতং তন্মূল্যং বা বিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানি। ততঃ প্রেতপক্ষে।

য়িষ্যে ইতি। স্বধা বদনং তদ্বাচয়িষ্যে কিমুদিত্যাকাঙ্ক্ষায়াং স্বধোচ্যতামিতি পিতৄণাং স্বধামন্ত্রমুচ্যতাং যদত্র শ্রাদ্ধে মন্ত্রমন্ত্রাদিকং তৎসর্ব্বমুক্তং ভবতু বিধ্যুক্তং ভবত্বিত্যর্থঃ। এবং পিতামহাদিষু বোদ্ধব্যম্। প্রত্যেকং বহুবচনমুক্তম্। তত ঊর্জ্জমিত্যপো নিষিঞ্চেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ ঊর্জ্জং বহন্তীরমৃতং ঘৃতং পয়ঃ কীলালং

পরিশ্রুতং স্বধা স্থ তর্পয়ত মে পিতন্। অস্যার্থঃ। হে আপো জগৎপ্রাণভূতা যূয়ং স্বধাস্থ নানাবিধময়ং ভবত ভবতস্তেনান্নেন পিতন্ তর্পয়তেত্যর্থঃ। ইতি প্রার্থনা।

ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ কৃতৈতৎ সপিণ্ডীকরণৈকোদ্দিষ্ট শ্রাদ্ধকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং রজতং
তন্মূল্যং বা বিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানি। ততো দৈবে উত্তরামুখঃ উপবীতী ওঁ অদ্যেত্যাদি পুরূরবো মাদ্রব-
সোর্বিশ্বেষাং দেবানাং কৃতৈতৎ পার্ব্বণশ্রাদ্ধকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিদং কাঞ্চনং অগ্নিদৈবতং তন্মূল্যং বা বিষ্ণুদৈবতং যথানাম
গোত্রায় ব্রাহ্মণাহং দদানি ইতি দক্ষিণাং দদ্যাৎ। ওঁ বিশ্বেদেবাঃ প্রীয়ন্তামিতি পৃচ্ছেৎ। ওঁ প্রীয়ন্তামিত্যুত্তরম্। ততো
দক্ষিণামুখঃ সুমনস্তন্মনা ভূত্বা দক্ষিণাং দিশং পশ্যন্ পিতামহান্ কৃতাঞ্জলির্যাচেৎ। ওঁ আশিষো মে প্রদীয়ন্তাং ইতি
পৃচ্ছেৎ। ওঁ আশিষঃ প্রতিগৃহ্যন্তামিত্যুক্তে। ওঁ দাতারো নো হভিবর্দ্ধন্তাং বেদঃ সন্ততিরেব চ। শ্রদ্ধা চ নো মাব্যগমদ্বহু দেয়ঞ্চ ১৫৩
নো হস্ত্বিতি। অন্নঞ্চ নো বহু ভবেদতিথীংশ্চ লভেমহি। যাচিতারশ্চ নঃ সন্তু মা চ যাচিষ্ম কঞ্চন। অন্নং প্রবর্দ্ধতাং নিত্যং
দাতা শতং জীবতু। যেভ্যঃ সংকল্পিতা দ্বিজাস্তেষামক্ষয়া তৃপ্তিরস্তু। এতাঃ সত্যাশিষঃ সন্তু ইতি প্রার্থয়েৎ। ওঁ
সন্ত্বিতি প্রতিবচনম্। ততঃ ওঁ দেবতাভ্য পিতৃভ্যশ্চ মহাযোগিভ্য এব চ। নমঃ স্বধায়ৈ স্বাহায়ৈ নিত্যমেব ভবন্ত্বিতি ত্রিঃ
পঠেৎ। ততঃ প্রেতপক্ষে ওঁ দেবতাভ্য ইতি ত্রিঃ পঠেৎ। ততঃ পিতামহাদিপক্ষে ওঁ বাজে বাজেহবত বাজিনো নো ধনেষু
বিপ্রা অমৃতা ঋতজ্ঞা অস্য মধ্বঃ পিবত মাদয়ধ্বং তৃপ্তা যাত পথিভির্দেবযানৈরিতি কুশাগ্রেণ পিতামহাদি ব্রাহ্মণান্ বিসৃজ্য

কিং কুর্ব্বতা উর্জ্জং পরমান্নরসময়ং ঘৃতং সর্পিঃ পয়ঃ ক্ষীরং কীলালং পক্বমন্নং পরিশ্রুতং সুরাং তচ্ছায়ভক্ষণধর্মেব বহন্তীঃ বহন্ত্যঃ প্রাপয়ন্ত্যঃ। যতো যয়ং নানাবিধময়ং

যহন্তাঃ পুষ্টা ভবত তস্মাদস্মাক পিতৃন্ তর্পয়ত বহন্তীতি বিভক্তিব্যত্যয়াৎ। (৩২) বাজে বাজে ইতি বিসৃজ্য অস্ত্রবজেদিতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ বাজে বাজে হবত বাজিনো নো ধনেষু বিপ্রা অমৃতা ঋতজ্ঞা অস্য মধ্বঃ পিবত মাদয়ধ্বং তৃপ্তা যাত পথিভির্দ্দেবযানৈঃ। অস্যার্থঃ। বাজমন্নং তদস্যাস্তীতি বাজী। তথাচাভিধানকাণ্ডম্। বাজং স্যাদন্নপক্ষয়োরিতি। হে বাজিনঃ পিতরঃ তদিদং শ্রাদ্ধদত্তমন্নং কৃতমকৃতং বা যূয়ং অবত রক্ষত অসুরৈর্যথা ন লুপ্যতে তথা কুরুত। বাজে বাজে অন্নে অন্নে যদা যদৈব পরিকল্পিতং স্যাদন্নং তদা তদৈব অবত রক্ষত ইত্যর্থঃ। ন কেবলমন্নরক্ষিতারো যূয়ং কিঞ্চ ধনেম্বপি ধনেষু রক্ষাং কুরুত। কিম্ভূতা যূয়ং বিপ্রা বিপ্রমূর্ত্তিধরাঃ

পশ্চাদ্দেবপক্ষে ব্রাহ্মণান্ কুশমূলেনোপবীতী বিসর্জ্জয়েৎ [ ৩২ ]। ততঃ প্রেতব্রাহ্মণং ওঁ অভিরম্যতামিতি বিসর্জ্জয়েৎ ওঁ অভিরতো-ঽস্মি ইত্যুত্তরম্। ততঃ ওঁ আ মা বাজস্য প্রসবো জগম্যাদেমে দ্যাবাপৃথিবী বিশ্বরূপে আ মা গন্তং পিতরামাতরা যুবমা মা সোমো ঽমৃতত্বায় গম্যাৎ। ইতি দক্ষিণবারিধারয়া ব্রাহ্মণান্ বেষ্টয়েৎ [ ৩৩ ]। ততো ব্রাহ্মণস্থান্ পিতৃন্ প্রণমেৎ। ততঃ পিণ্ডান 

বিপ্রদেহস্থা এব পিতরো ভুঞ্জতে যতঃ। পুনঃ কীদৃশাঃ অমৃতাঃ অমরণধর্ম্মাঃ প্রাপ্তপিতৃদেহত্বাৎ। পুনঃ কীদৃশাঃ ঋতজ্ঞাঃ সত্যশালিনঃ। কিঞ্চ এতৎ মধ্বস্নীনি মধুনি মধুবদানন্দযুক্তানি পিতরঃ পীত্বা চ মাদয়ধ্বং হর্ষযুক্তা ভবত হৃষ্টা ভবত ইত্যর্থঃ। কিঞ্চ তৃপ্তাঃ সন্তো যৈঃ পথিভির্দ্দেবা যান্তি তৈঃ পথিভিঃ যূয় গচ্ছত। মধ ইতি ছান্দস-স্বাময়স্যাগমঃ। (৩৩) ততঃ প্রদক্ষিণীকৃত্য প্রণমেৎ ইতি কাত্যায়নঃ। মন্ত্রস্তু। ওঁ আ মা বাজস্য প্রসবো জগম্যাদেমে দ্যাবাপৃথিবী বিশ্বরূপে আ মা গন্তম্।

অথ সংক্ষেপেণ ক্রমাৎ প্রেতশ্রাদ্ধাধিকারিণো নিরূপ্যন্তে ॥ * ॥ জ্যেষ্ঠপুত্র ১ কনিষ্ঠপুত্র ২ পৌত্র ৩ প্রপৌত্র ৪ অপুত্র-
পত্নী ৫ কর্ম্মাসমর্থ পুত্রযুক্তপত্নী ৬ কন্যা ৭ বাগ্‌দত্তা ৮ দত্তা কন্যা ৯ দৌহিত্র ১০ কনিষ্ঠ সহোদর ১১ জ্যেষ্ঠ সহোদর ১২ কনিষ্ঠ
বৈমাত্রেয় ১৩ জ্যৈষ্ঠ বৈমাত্রেয় ১৪ কনিষ্ঠ সহোদরপুত্র ১৫ জ্যেষ্ঠ সহোদরপুত্র ১৬ কনিষ্ঠ বৈমাত্রেয়পুত্র ১৭ জ্যেষ্ঠ বৈমাত্রেরপুত্র ১৮
পিতৃ ১৯ মাতৃ ২০ পুত্রবধূ ২১ পৌত্রী ২২ দত্তা পৌত্রী ২৩ পৌত্রবধূ ২৪ প্রপৌত্রী ২৫ দত্তাপ্রপৌত্রী ২৬ পিতামহ ২৭ পিতা-
মহী ২৮ পিতৃব্যাদি সপিণ্ড ২৯ সমানোদক ৩০ সগোত্র ৩১ মাতামহ ৩২ মাতামহী ৩৩ মাতুল ৩৪ ভাগিনেয় ৩৫ মাতৃপক্ষ
সপিণ্ড ৩৬ সমানোদক ৩৭ অসবর্ণাভার্য্যা ৩৮ অপরিণীতা স্ত্রী ৩৯ শ্বশুর ৪০ জামাতৃ ৪১ পিতামহীভ্রাতৃ ৪২ শিষ্য ৪৩ ঋত্বিক্ ৪৪
আচার্য্য ৪৫ মিত্র ৪৬ পিতৃমিত্র ৪৭ এক গ্রামবাসি গৃহীত বেতন সজাতীয়া ৪৮ ইত্যষ্টচত্বারিংশৎ প্রকারাঃ। স্ত্রিয়াস্তু জ্যেষ্ঠ- ৩৫৬
পুত্র ১ কনিষ্ঠপুত্র ২ পৌত্র ৩ প্রপৌত্র ৪ কন্যা ৫ বাগ্‌দত্তা ৬ দত্ত্বা ৭ দৌহিত্র ৮ সপত্নীপুত্র ৯ পতি ১০ স্নুষা ১১ সপিণ্ড ১২
সমানোদক ১৩ সগোত্র ১৪ পিতৃ ১৫ ভ্রাতৃ ১৬ ভগিনীপুত্র ১৭ ভর্ত্তৃভাগিনেয় ১৮ ভ্রাতৃপুত্র ১৯ জামাতৃ ২০ ভর্ত্তৃমাতুল ২১
ভর্ত্তৃশিষ্য ২২ পিতৃসমানোদক পিতৃবংশাঃ মাতৃসমানোদক মাতৃবংশাঃ ২৩ দ্বিজোত্তমাশ্চেতি ২৪ চতুর্বিংশতি প্রকারাঃ। যত্র
তু কতিচিৎ শ্রাদ্ধানি কৃত্বা কশ্চিন্মৃতস্তদবশিষ্টানি প্রেতশ্রাদ্ধানি তদনন্তরাধিকারিণা কার্য্যাণি ন তু সর্ব্বাণি। স্ত্রীণান্তু কেবল
মেকোদ্দিষ্টশ্রাদ্ধে সপিণ্ডনে চাধিকারঃ তত্র তস্যাং কর্ত্তৃত্বাৎ। অন্যত্র তু ভোক্তৃত্বান্নাধিকারঃ অবিধবা তু যবেন দূর্ব্বয়া চ শ্রাদ্ধং কুর্য্যাৎ।
কুর্য্যাদবিধবা শ্রাদ্ধং যবেনাপ্যথ দূর্ব্বয়া। ন স্পৃশেৎ তিলদর্ভাংশ্চ যাবদ্ভর্ত্তৃবিভূষিতা। ইতি যতিধর্ম্মধৃতবচনাৎ। শ্রাদ্ধে চন্দনকুঙ্কুম-

পিতরা মাতরা যুব মা যা সোমোঽমৃতত্বায় গম্যাদিতি। অস্যার্থঃ। রাজস্য শ্রাদ্ধদত্তান্নস্য প্রসবঃ ফলং মা মাং আ জগম্যাৎ পুনঃ পুনরাগচ্ছতু। ইমে দ্যাবাপৃথিবী মা মাং জগম্যেতাং পুনঃ পুনরাগচ্ছতং। কিম্ভূতে দ্যাবাপৃথিবী বিশ্বরূপে বিশ্বং জগৎ তদেব রূপং যয়োস্তে বিশ্বরূপে এতেন দ্যাবাপৃথিবীসম্বন্ধি যৎ কল্যাণফলং তৎ মা মা গচ্ছত্বিত্যাশংসা। কিঞ্চ হে মে মম পিতরামাতরা পিতরৌ যুবং যুবাং মা মাং আগন্তুং আগচ্ছতং যদা যদা শ্রাদ্ধং করোমি তদা তদা মম মাতাপিতরা-বাগচ্ছতামিত্যর্থঃ। যুবমিতি প্রথমাদ্বিবচনে ভাষায়ামিতি সূত্রে ভাষাগ্রহণাচ্ছন্দসি আকারো ন ভবতি। আগন্তমিতি ছান্দসত্বাদামঃ ন শপ্লোপঃ ছকারলোপশ্চ



গো হজ বিপ্রেভ্যো দদ্যাৎ। অগ্নৌ জলে বা ক্ষিপেৎ। ততঃ পার্ব্বণবদ্বামদেব্যং গীত্বা গানাশক্তৌ ঋক্চতুষ্টয়ং ত্রিধা পঠিত্বা দক্ষিণ-পাণিনা দীপমাচ্ছাদ্য হস্তৌ প্রক্ষাল্যাচম্যাচ্ছিদ্রাবধারণং কৃত্বা বিষ্ণুং স্মরেৎ॥ * ॥ ইতি সপিণ্ডীকরণশ্রাদ্ধপ্রয়োগঃ॥ * ॥

নিরুক্তলক্ষণাৎ। কিঞ্চ পিতৃণাং সোমো রাজা মা মাং আগম্যাৎ আগচ্ছতু কিমর্থং অমৃতত্বায় মোক্ষায় তদেবং শ্রাদ্ধং কৃত্বা বিসর্জ্জিতেষু অনুব্রজনে ক্রিয়মাণে শ্রাদ্ধফলং পার্থিবসুখং স্বর্গসুখঞ্চ মম ভবতু মোক্ষশ্চ ভবত্বিত্যর্থঃ। প্রজানিঃশ্রেয়সার্থমিত্যাপস্তম্বেন শ্রাদ্ধস্য মোক্ষফলত্বাভিধানাৎ। দ্যাবাপৃথিবী ইতি দৌশ্চ পৃথিবী চ ছান্দসত্বাৎ ন দ্বিবচনম্। আজগম্যাদিতি গমের্যঙন্তাৎ লিঙ্ ছান্দসত্বান্নাভ্যাসস্যারাগমঃ। আগন্তুং ব্যবহিতেনাভিসম্বন্ধঃ। মাতাপিতরাবিত্যত্রে নিপাতনাদাত্বম্॥ * ॥ * ॥

কর্পূরাগুরু পদ্মকাষ্ঠানি অনুলেপনানি প্রশস্তানি। এতানি পুষ্পিতানি প্রশস্তানি। শুক্ল জাতিপুষ্পং কুন্দপুষ্পং মল্লিকাপুষ্পং যূথিকাপুষ্পং এবম্বিধমন্যৎ শুক্লপুষ্পং পদ্মোৎপলানি গন্ধরূপোপন্নান্যেবম্বিধান্যন্যানি এবং কেতকীপুষ্পং করবীরপুষ্পং বকুল পুষ্পং চম্পকপুষ্পঞ্চ প্রশস্তং। নিষিদ্ধানি তু জবাকুসুমং ভাণ্ডীপুষ্পং অর্কপুষ্পং পীতাঝিণ্টী উগ্রগন্ধিন্যগন্ধীনি চৈত্যবৃক্ষোদ্ভবানি রক্তপুষ্পাণি চ কিন্তু জলজ কুসুমানি রক্তান্যপি প্রশস্তানি এবং করবীর বকেরক্তেপ্যনিষিদ্ধে ॥ * ॥ * ॥

অথ অন্ত্যেষ্টিপদ্ধতিঃ। গতপ্রাণং জ্ঞাত্বা পুত্রাদিঃ স্নাত্বা অন্নংকৃত্বা স্থাপয়েৎ। ততো গতপ্রাণং স্নাপয়িত্বা বাসসা সর্ব্বশরীরমাচ্ছাদ্যাস্তীর্ণ কুশায়াং ভূমৌ দক্ষিণাশিরসং স্থাপয়েৎ। ততো ঘৃতেনাভ্যজ্য ওঁ গয়াদীনি চ তীর্থানি যে চ পুণ্যাঃ শিলোচ্চয়াঃ। কুরুক্ষেত্রঞ্চ গঙ্গাঞ্চ যমুনাঞ্চ সরিদ্বরাং কৌশিকীং চন্দ্রভাগাঞ্চ সর্ব্ব পাপপ্রনাশিনীং। ভদ্রাবকাশাং সরযূং পনসাং গণ্ডকীস্তথা। বৈণবঞ্চ বরাহঞ্চ তীর্থং পিণ্ডারকং তথা। পৃথিব্যাং যানি তীর্থানি সরিতঃ সাগরাংস্তথা। ইতি চিন্তয়িত্বা পুনঃ স্নাপয়েৎ। বস্ত্রান্তরং পরিধাপ্য উপবীতমুত্তরীয়ঞ্চ ধারয়িত্বা চন্দনাদিনোপলিপ্য কর্ণনাসিকানেত্রদ্বয় মুখাত্মকেষু সপ্ত সুছিদ্রেষু সপ্ত সুবর্ণখণ্ডিকাঃ প্রক্ষিপেৎ তদভাবে কাংস্য খণ্ডিকাঃ। ততো বস্ত্রান্তরেণাচ্ছাদ্য বহেয়ুঃ। বহনকালে আমপাত্রস্থং তদন্নার্দ্ধং বর্ত্মার্দ্ধে ত্যজেৎ অর্দ্ধং পিণ্ডার্থমবশেষয়েৎ। ততো বহ্নিদাতা পুত্রাদিশ্চিতাভূমৌ গত্বা তদন্নার্দ্ধং সতিলং পিণ্ডদানেতিকর্ত্তব্যতয়োৎসৃজেৎ। যথা গোময়োপলিপ্তায়াং ভূমৌ পাতিতবামজানুঃ প্রাচীনাবীতী মণ্ডলং কৃত্বা কুশমূলেন ওঁ অপহতাসুরারক্ষাংসি বেদিষদ ইত্যনেন দক্ষিণাগ্রাং রেখাং কুর্য্যাৎ তদুপরি কুশানাস্তীর্য্য ওঁ এহিপ্রেত সৌম্য ইত্যাদি নিযচ্ছেত্যন্তং পঠিত্বাবাহ্য সতিল জলপাত্রং বাম- 

হস্তাদ্দক্ষিণহস্তেন গৃহীত্বা ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নবনেনিক্ষ্ব ইত্যবনেজয়েৎ। ততঃ ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্ম-
ন্নেতত্তে হন্নমুপতিষ্ঠতামিতি বামহস্ত গৃহীতান্নপাত্রাদন্নার্দ্ধং সতিলং দক্ষিণহস্তেন গৃহীত্বা কুশোপরি দদ্যাৎ। পিণ্ডপাত্র ক্ষালন
জলেন তদুপরি পুনরবনেজন তুষ্ণীং গন্ধাদি দানং সামগেতরেষান্তু নাবাহনমিতি বিশেষঃ। ততঃ পুত্রাদিঃ স্নানং কৃত্বা চিতাং
রচয়িত্বা তত্র দারুচয়ং কুর্য্যাৎ তদুপরি বস্ত্রদ্বয় সহিতং দক্ষিণাশিরসং সামগমধোমুখং ন্যসেৎ। নার্য্যাস্তূত্তান দেহত্বং সামগেত-
রেষামুত্তরাশিরস্ত্বং। তত ওঁ দেবাশ্চাগ্নিমুখাঃ সর্ব্বেহুতাশন গৃহীত্বা এনং দহন্ত্বিতি মনসা ধ্যাত্বা অগ্নিং গৃহীত্বা ওঁ কৃত্বা তু দুষ্করং
কর্ম্ম জানতাবাপ্যজানতা। মৃত্যুকালবশং প্রাপ্য নরং পঞ্চত্বমাগতং। ধর্ম্মাধর্ম্মসমাযুক্তং লোভমোহসমাবৃতং। দহেয়ং সর্ব্ব
গাত্রাণি দিব্যান্ লোকান্ স গচ্ছতু। ইতি পঠিত্বা প্রদক্ষিণং কৃত্বা দক্ষিণাস্যঃ শিরঃ স্থানে দদ্যাৎ। স্ত্রীদাহেপি নরমিত্যেব পাঠঃ ৩৫৮
ন নারীমিত্যূহঃ। ততো দাহে বৃত্তে প্রাদেশমাত্রাঃ সপ্তকাষ্ঠিকা গৃহীত্বা চিতাগ্নিং সপ্ত বারান্ প্রদক্ষিণীকৃত্য একৈকক্রমেণ চিতাগ্নৌ
ক্ষিপেৎ। ততঃ কুঠারেণ ক্রব্যাদায় নমস্তভ্যমিতি সকৃৎ পঠিত্বা চিতাস্থ জ্বলদ্দারূপরি সপ্ত প্রহারা দেয়াঃ। তমগ্নিমপশ্যদ্ভির্বামা-
বর্ত্তেন স্নাতুং নদীগন্তব্যা। নগ্নং শবং ন দহেৎ সর্ব্ব শরীরং ন দহেৎ কিঞ্চিদবশেষয়েৎ। শবসম্বন্ধি বস্ত্রাদি শ্মশানবাসি চাণ্ডা-
লাদিভ্যো দদ্যাৎ। সূতিকাং রজস্বলাঞ্চ সতিল পঞ্চগব্য জলপূর্ণকুম্ভং আপোহিষ্ঠা বামদেব্যাদিভিরভিমন্ত্র্য স্নাপয়িত্বা দহেদিতি
বিশেষঃ। গর্ভবত্যাস্ত গর্ভং নিঃসার্য্য স্থানান্তরে নিক্ষিপ্য তস্যা দাহঃ কর্ত্তব্যঃ। জলসমীপং গত্বা পুত্রাদয়ঃ প্রত্যুত্তরদানাভিজ্ঞং
শ্যালকাদিকং প্রার্থয়েয়ুঃ। উদকং করিষ্যাম ইতি তেন চ কুরুধ্বং মা চৈবং পুনরিত্যশতবর্ষে প্রেতে কুরুধ্বমেবেতরস্মিন্নিত্যুক্তে

দন্তে বৃদ্ধপুরঃসরমবতরণং জলে। ততঃ পরিহিত বস্ত্রং প্রক্ষাল্যতদেব পরিধায় প্রাচীনাবীতিনো দক্ষিণামুখাঃ ওঁ অপনঃ শোশুচ-দঘমিত্যনেন বামহস্তানামিকায়াং অপ আলোড্য একবস্ত্রাঃ সকুন্নিমজ্জ্যোন্মজ্জ্যচম্য দক্ষিণামুখাস্তর্পয়েয়ুঃ ওঁ অমুক গোত্রং প্রেতমমুক দেবশর্ম্মাণং তর্পয়ামীতি সামগানাং প্রয়োগঃ। যজুর্ব্বেদিনাস্তু ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তে তিলোদকং তৃপ্যস্বেতি। একাঞ্জলিদানমাবশ্যকং অঞ্জলিত্রয়দানে কলাতিশয়ঃ। ততঃ পুনঃ স্নাত্বা জলাদ্বাল পুরঃসর উত্থায় শাদ্বলে উপবিশ্য মানুষ্যে কদলীস্তম্ভনিঃ সারে সারমার্গণং। যঃ করোতি স সংমূঢ়ো জলবুদ্বুদসন্নিভে। পঞ্চধা সম্ভৃতঃ কায়ো যদি পঞ্চত্বমাগতঃ। কর্ম্মভিঃ স্বশরীরোত্থৈস্তত্র কা পরিদেবনা। গন্ত্রী বসুমতী নাশমুদধির্দৈবতানি চ। ফেন প্রখ্যঃ কথং নাশং মর্ত্ত্য লোকা ন যাস্যতি। শ্লেষ্মাশ্রুবান্ধবৈর্মুক্তং প্রেতো ভুঙ্‌ক্তে যতো হবশঃ। অতো নরোদিতব্যস্তু ক্রিয়া কার্য্যা বিধানতঃ। ইতি চিন্তয়িত্বা গৃহদ্বারমাগত্য নিম্বপত্রাণি দন্তৈঃ খণ্ডয়িত্বাচম্য শমী পাপং শময়ত্বিতি শমীং স্পৃষ্ট্বা ওঁ অশ্মেবস্থিরো ভুয়াসমিত্যশ্মানং পদা স্পৃষ্ট্বা ওঁ অগ্নিনঃ শর্ম্ম যচ্ছত্বিত্যগ্নিং স্পৃষ্ট্বা বৃষভ ছাগয়োর্মধ্যে স্থিত্বা ওঁ যোগিতি মন্ত্রেণ দ্বাবপি স্পৃষ্ট্বা উদকং গোময়ং গৌরসর্ষপঞ্চ স্পৃষ্ট্বা বালপুরঃসরং গৃহং প্রবিশেয়ুঃ। দিবাচেদ্দাহস্তদা রাত্রৌগ্রাম প্রবেশঃ। রাত্রৌ চেত্তদা দিবা। অশক্তৌ ব্রাহ্মণানুমতিং গৃহীত্বা কালপ্রতীক্ষণং বিনাপি প্রবেষ্টব্যং ॥ * ॥ 

অথ পূরক পিণ্ডদানং। তত্র ক্রমঃ দাহানন্তরং পুত্ত্রাদেরাগমনেপি দাহকর্ত্তুরেব পিণ্ডদানাধিকারঃ। উদক করণ এবান্যেষামধিকারঃ। এবং প্রথম পিণ্ডে যাবদেব ঘৃতাদিকং দ্রব্যং তাবদেব নবস্বু পিণ্ডেষু দদ্যাৎ। মষাধিকং নবান্নানং এবং জলসমীপে গৃহসমীপে বা তণ্ডুল প্রসৃতিদ্বয়ং দ্বিঃ প্রক্ষাল্য ঐশান্যাং দিশি সুস্বিন্নং পচেৎ। ততঃ পবিত্রপাণিঃ

প্রাচীনাবীতী পাতিত বামজানুর্দক্ষিণামুখঃ হস্ত প্রমাণাং চতুরঙ্গুলোচ্ছায়াং দক্ষিণাপ্লবাং পিণ্ডিকাং কৃত্বা তদুপরি ওঁ অপহতেত্যনেন দক্ষিণাগ্রাং রেখাং কৃত্বা দর্ভানাস্তীর্য্য ওঁ এহি প্রেত সৌম্যেত্যাদি নিষচ্ছত্যন্তং পঠিত্বাবাহ্য ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নবনেনিক্ষ্বেত্যাস্তীর্ণ কুশোপরি সতিল জলেনাবনেজয়েৎ। ততস্তিল মধু ঘৃতাদিমিশ্রং তপ্ত পিণ্ডং গৃহীত্বা ওঁ অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ এতৎ প্রথম পিণ্ডং পূরকং ইত্যবনেজন স্থানে দদ্যাৎ। ততঃ পিণ্ডপাত্র প্রক্ষালন জলেন পুনরবনেজয়েৎ। তত ওঁ অমুক গোত্র প্রেতামুক দেবশর্ম্মন্নেতত্তে ঊর্ণাতন্তুময়ং বাসঃ। তত আম মৃণ্ময় পাত্রে জলাঞ্জলিং পিণ্ডসমীপে স্থাপয়িত্বা গন্ধং মাল্যঞ্চ যথাশক্তি দদ্যাৎ। বাষ্প পর্য্যন্তং পিণ্ডং পশ্যংস্তিষ্ঠেৎ। ততঃ পিণ্ডাদিকং জলে ক্ষিপেৎ। কালেপ্যকৃতচূড়োপনয়নানূঢ়কন্যানাং কুশাস্তরণং বিনেতি বিশেষঃ। এবং কৃতচূড়ানামুপনয়ন কালাৎ প্রাগ্দর্ভোপরি পিণ্ডদানং তথাপাত্রান্তরে উদকং। উপনয়নকালে আগতে কৃতোপনয়নানাং দর্ভোপরি পিণ্ডদানং। এবমষ্টবর্ষ বিবাহকাল আগতে ঊঢ়স্ত্রীণাং দর্ভোপরি পিণ্ডদানং। ততো রাত্রাবাচম্য দক্ষিণামুখঃ প্রাচীনাবীতী ত্রিকাষ্ঠিকোপরি মৃণ্ময়পাত্রে উদকং তথা পাত্রান্তরে ক্ষীরং নিধায় ওঁ প্রেতাত্র স্নাহি পিবচেদং ক্ষীরমিতি ব্রূয়াৎ। এতদেকরাত্রে আবশ্যকং দশরাত্রে ফলভূমার্থমিতি। দ্বিতীয় পিণ্ডাদিষু দ্বিতীয় পিণ্ডং পূরকমিত্যাদি বিশেষঃ। দ্বিতীয় পিণ্ডে মৃণ্ময়পাত্রদ্বয়ং। এবং তৃতীয়াদি পিণ্ডে পাত্রাদি বৃদ্ধির্যেন পঞ্চপঞ্চাশত্তোয়পাত্রাণ্যঞ্জলয়শ্চ ভবন্তি। ত্র্যহাশৌচে প্রথম দিনে পিণ্ডত্রয়ং দ্বিতীয় দিনে চতুষ্টয়ং তৃতীয় দিনে ত্রয়ং। প্রথমে এবং দ্বিতীয়ে চতুষ্টয়ং তৃতীয়ে পঞ্চকমিতি বা। চতুরহাশৌচে প্রথম চতুর্থয়োর্দিনয়োর্দ্বৌদ্বৌ দ্বিতীয়তৃতীয়য়োস্ত্রয়ঃ পিণ্ডাঃ। পঞ্চা- 

হাশৌচে তু প্রথমপঞ্চমদিনয়োরেকৈকঃ দ্বিতীয়চতুর্থয়োর্দ্বৌ দ্বৌ তৃতীয়ে চত্বারঃ। ষড়হাশৌচে তু তৃতীয়চতুর্থদিনয়োস্ত্রয়স্ত্রয়ঃ পিণ্ডাঃ শেষেষ্বেকৈকঃ। সপ্তাহাশৌচে তু তৃতীয়চতুর্থপঞ্চম দিনেষু দ্বৌ দ্বৌ শেষেষ্বেকৈকঃ। অষ্টাহাশৌচে তু চতুর্থপঞ্চমদিনয়োর্দ্বৌ দ্বৌ শেষেষ্বেকৈকঃ। নবাহাশৌচে তু পঞ্চমদিনে দ্বৌ শেষেষ্বেকৈকঃ। পক্ষিণী দ্ব্যহাশৌচয়োস্তু আদ্যদ্বিতীয়দিনয়োঃ পঞ্চ পঞ্চ পিণ্ডাঃ। দ্বাদশাহাদ্যশৌচে তু নবসু দিনেষু নব পিণ্ডাঃ। শেষ দিনে দশম পিণ্ডঃ। সদ্যঃ শৌচৈকাহাশৌচয়োস্তু ঐকাহ এব-দশপিণ্ডাঃ। অশৌচান্তরমধ্যেপি পিণ্ডা দেয়া রাত্রাবপি ॥ * ॥ * ॥ * ॥ * ॥

অথ গঙ্গায়ামস্থিক্ষেপঃ ॥ * ॥ তৎ প্রয়োগস্তু। স্নাত্বাচম্য উদঙ্মুখঃ কুশত্রয়সতিলজলান্যাদায় ওঁ তৎসদিত্যুচ্চার্য্য অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণ এতদস্থিসমসংখ্য বর্ষসহস্রাবচ্ছিন্ন স্বর্গাধিকরণক মহীয়মানত্বকামো হমুক গোত্রস্যামুক দেব-শর্ম্মণ এতান্যস্থীনি গঙ্গায়াং নিঃক্ষিপামীতি সংকল্প্যাপসব্যং কৃত্বা অস্থীনি পঞ্চগব্যেন সিক্ত্বা হিরণ্যমধ্বাজ্যতিলৈঃ সংযোজ্য মৃত্তিকাপুটে স্থাপয়িত্বা দক্ষিণহস্তেন পুটকমাদায় দক্ষিণাং দিশং পশ্যন্ ওঁ নমোঽস্তু ধর্ম্মায়েতি বদন্ জলং প্রবিশ্য ওঁ স মে প্রীতো ভবত্বিত্যুক্ত্বা ক্ষিপেৎ। ততো নিমজ্জ্যোত্থায় সূর্য্যং দৃষ্ট্বা দক্ষিণাং দদ্যাৎ ॥ * ॥ * ॥ * ॥

অথ পর্ণনরদাহঃ শরপত্রৈঃ পুত্তলিকাং কৃত্বা পলাশ পত্রাণি যথাস্থানং যোজয়েৎ। এতত্তু অস্থ্যভাবে। তদযথা শিরসি চত্বারিংশৎ ৪০। গ্রীবায়াং দশ ১০। উরসি ত্রিংশৎ ৩০। উদরে বিংশতি ২০। বাহ্বোরূরুদ্বয়ে পঞ্চাশৎ পঞ্চাশৎ ৫০। হস্তদ্বয়াঙ্গুলিষু পঞ্চ পঞ্চ৫। অণ্ডদ্বয়ে ত্রীণি ত্রীণি ৩। শিশ্নে চত্বারি ৪। দক্ষিণজানুজংঘয়োঃ পঞ্চদশ ১৫। বামজানুজংঘয়োঃ পঞ্চদশ ১৫। পাদদ্বয়াঙ্গুলিষু পঞ্চ পঞ্চ ৫।

দেয়ানি। এবং পুত্তলিকাং কৃত্বা মেষলোমসূত্রেণ সংবেষ্ট্য যবপিষ্টেন পরিলিপ্য পূর্ব্ববদ্দহেৎ। অশৌচান্তিম দিনে বস্ত্রশুদ্ধিক্ষৌর নববস্ত্র
পরিধান মঙ্গলানি কুর্য্যাৎ। ওঁ নমো গোভ্যঃ শ্রীমতীভ্যঃ সৌরভেয়ীভ্য এব চ। নমো ব্রহ্মসুতাভ্যশ্চ পবিত্রাভ্যো নমো নমঃ॥ ইতি॥

অথ সামগানাং চতুর্থাশান্তিঃ॥ * ॥ পুত্রাদিঃ স্নাত্বা অগ্নিং প্রজ্বাল্যাচম্য তদ্বিষ্ণোরিতি স্মৃত্বা পূর্ব্বাভিমুখঃ পাত্রচতুষ্টয়ে
জলং সংস্থাপ্য প্রথমপাত্রে হস্তং দত্বা গায়ত্রীং পঠেৎ। ওঁ অগ্নিমীলে পুরোহিতং যজ্ঞস্য দেবমৃত্বিজং হোতারং রত্নধাতমম্।
পুনর্গায়ত্রীং পঠেৎ। ইত্যেকা শান্তিঃ॥ ১॥ অপর পাত্রে হস্তং দত্বা গায়ত্রীং পঠেৎ। ওঁ ইষেত্বোর্জ্জেত্বা বায়বস্থ দেবো বঃ সবিতা
প্রাপয়তু শ্রেষ্ঠতমায় কর্ম্মণে। পুনর্গায়ত্রীং পঠেৎ। ইতি দ্বিতীয়া শান্তিঃ॥ ২॥ ততো গাঙ্গটীং কুলত্থঞ্চ দন্তেন চর্ব্বয়িত্বা
নিষ্ঠীব্যাচামেৎ। তৃতীয় পাত্রে হস্তং দত্বা গায়ত্রীং পঠেৎ। অগ্ন আয়াহি বীতয়ে গৃণানো হব্যদাতয়ে নিহোতা সৎসি বর্হিষি।
পুনর্গায়ত্রীং পঠেৎ॥ ৩॥ চতুর্থ পাত্রে হস্তং দত্বা গায়ত্রীং পঠেৎ। ওঁ শন্নো দেবীরভিষ্টয়ে শন্নো ভবন্তু পীতয়ে শং যোরভি-
স্রবন্তু নঃ। মহাবাম দেব্যঋষির্বিরাড়্ গায়ত্রীছন্দ ইন্দ্রোদেবতা চতুর্থা শান্তিকর্ম্মণি বিনিয়োগঃ। ওঁ কয়া নশ্চিত্র আভুবদূতী সদা-
বৃধঃ সখা কয়া সচিষ্ঠয়া বৃতা। ওঁ কস্ত্বা সত্যো মদানাং মংহিষ্ঠো মৎসদন্ধসঃ। দৃঢ়াচিদা রুজে বসুঃ। ওঁ অভিষূণঃ সখীনামবিতা
জরিতৄণাং শতং ভবা স্যূতয়ে॥ ওঁ স্বস্তি ন ইন্দ্র ইত্যাদি বৃহস্পতির্দধাতু ইত্যন্তম্॥ দ্যৌঃ শান্তিরন্তরীক্ষং শান্তিঃ পৃথিবী
শান্তি আপঃ শান্তিঃ ওষধয়ঃ শান্তিঃ বনস্পতয়ঃ শান্তিঃ শান্তিরেব শান্তিঃ। সর্ব্বং জলং একীকৃত্য সর্ব্বাশৌচদ্রব্যানি
প্রোক্ষয়েৎ॥ * ॥ ইতি সামগানাং চতুর্থা শান্তিঃ॥ * ॥ * ॥ * ॥ * ॥

অথাঙ্গপ্রায়শ্চিত্তং ॥ * ॥ তত্র সূর্য্যোদয়ানন্তরং সশিরস্কমাত্রং স্নাত্বা মাঙ্গল্যং ঘৃতাদিনা অগ্নিগোব্রাহ্মণসুবর্ণ-জলরাজস্পর্শনং সূর্য্যদর্শনঞ্চ ঘৃতাদিকং স্পৃষ্ট্বা অশৌচকালোৎপন্ন পঞ্চশূনাজনিত পাপক্ষয়ায় প্রায়শ্চিত্তং কুর্য্যাৎ। যথা ওঁ অদ্যেত্যাদি অমুক গোত্রঃ শ্রী অমুক দেবশর্ম্মা অশৌচকালোৎপন্ন পঞ্চশূনাজনিত পাপক্ষয়কাম ইদং কাঞ্চনং বিষ্ণুদৈবতং যথাসম্ভব গোত্রায় ব্রাহ্মণায়াহং দদে। ইত্যুৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। সামগো বামদেব্যগানেন শান্তিং কুর্য্যাৎ। গানাশক্তৌ বামদেব্যঋক্ চ ত্রিধা পঠেৎ ততো মহাবামদেব্যঋষিরিত্যনেন শান্তিং কুর্য্যাৎ ॥ * ॥ * ॥ * ॥

ততো হেমগর্ভ তিলদানম্ ॥ * ॥ তত্র ক্রমঃ। প্রাঙ্মুখ উদঙ্মুখং ব্রাহ্মণং ব্রাহ্মণায় নমঃ ইতি গন্ধপুষ্পাভ্যাং পূজয়িত্বা এতে গন্ধপুষ্পে ওঁ সবস্ত্রতৈজসাধার হেমগর্ভ তিলেভ্যো নমঃ। ইতি সংপূজ্য এতে গন্ধপুষ্পে এতদধিপতয়ে ওঁ বিষ্ণবে নমঃ। এতে গন্ধ-পুষ্পে এতৎ সম্প্রদান ব্রহ্মণায় নমঃ। বামহস্তেন তিলান্ স্পৃষ্ট্বা কুশত্রয় তিলজলান্যাদায় ওঁ তৎসদিত্যুচ্চার্য্য অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো ঽশৌচন্তাদ্দ্বিতীয়ে ঽহ্নি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ এতত্তিলসমসংখ্য বর্ষাবচ্ছিন্ন স্বর্গাধিকরণক মোদমানত্বকামঃ। এতান্ সবস্ত্র তৈজসাধার হেমগর্ভ তিলান্ অর্চ্চিতান্ বিষ্ণুদেবতাকান্ অমুম গোত্রায় অমুক দেব-শর্ম্মণে ব্রাহ্মণায় তুভ্যমহং দদানীতি সম্প্রদানব্রাহ্মণহস্তে জলং দদ্যাৎ। এবমেব পিতৃদয়িতা দানসাগরয়োঃ। স্বর্গামি ফলে তু সম্প্রদদে ইতি বিশেষঃ। গৃহীতা তিলমুষ্টিমাদায় ওঁ স্বস্তীতি ব্রূয়াৎ। ততো গায়ত্রীং পঠেৎ। এতে সবস্ত্রতৈজসা-ধারহেমগর্ভতিলা বিষ্ণুদেবতাকা ইতি বদেৎ ॥ ততো যথাশাখং কামস্তুতিং পঠেৎ। সামবেদ তু ওঁ

প্রদক্ষিণং ভূমেরসন্নিধানে তামুদ্দিশ্য প্রদক্ষিণং বাস্তু। এতে গন্ধপুষ্পে ওঁ সাচ্ছাদনায়ৈ প্রিয়দত্তায়ৈ তদ্ভুমৈ্য নমঃ ইতি ত্রিঃ সম্পূজ্য এতে
গন্ধপুষ্পে এতদধিপতয়ে ওঁ বিষ্ণবে নমঃ। এতে গন্ধপুষ্পে এতৎ সম্প্রদানায় ব্রাহ্মণায় নমঃ। ইতি সম্পূজ্য ওঁ তৎসদদ্যামুকে মাস্যমুক
পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো ঽশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রস্য প্রেতস্য অমুকদেবশর্ম্মণঃ যষ্টিবর্ষসহ
স্রাবচ্ছিন্নস্বর্গ কাম ইমাং সাচ্ছাদনাং প্রিয়দত্তাং ভূমিং বিষ্ণুদেবতাকাং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানি ইত্যুৎসৃজ্য দক্ষিণাং
কুর্য্যাৎ। যথা ওঁ তৎসদদ্যামুকে মাস্যমুকে পক্ষে ঽমুক তিথৌ অমুক গোত্রস্যামুক দেবশর্ম্মণো ঽশৌচান্তাদ্দ্বিতীয়েঽহ্নি কৃতৈতৎ সাচ্ছা-
দন তদ্ভূমিদানকর্ম্মণঃ সাঙ্গতার্থং দক্ষিণামিদং বিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানীতি ॥ ১ ॥ আসনস্য উত্তানাঙ্গিরো
দেবতা রাজ্যস্থানুত্তমস্বর্গপ্রাপ্তিঃ ফলম্। বাক্যং সর্ব্বত্রৈব উৎসর্গবাক্যে চ অদ্যেত্যাদি অশৌচান্তাদ্দ্বিতীয়েঽহ্নি ইত্যন্তং তুল্যং
জ্ঞেয়ম্। এতে গন্ধপুষ্পে ওঁ সাচ্ছাদনদার্ব্বাসনায় নমঃ ইতি ত্রিঃ সংপূজ্য এতে গন্ধপুষ্পে এতদধিপতয়ে ওঁ বিষ্ণবে নমঃ
এতে গন্ধপুষ্পে ওঁ এতৎ সম্প্রদানায় ব্রাহ্মণায় নমঃ। ইতি সংপূজ্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ
স্বর্গকাম ইদং সাচ্ছাদনদার্ব্বাসনং বিষ্ণুদৈবতং যথানাম গোত্রায় ব্রাহ্মণায়াহং দদানীত্যুৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। যথা ওঁ অদ্যে-
ত্যাদি কৃতৈতৎ সাচ্ছাদনদার্ব্বাসনদানকর্ম্মণঃ সাঙ্গতার্থং ইত্যাদি ॥ ২ ॥ জলস্য বরুণো দেবতা তৃপ্তিঃ ফলম্। বাক্যন্তু এতে
গন্ধপুষ্পে ওঁ সাচ্ছাদন তৈজসাধার জলায় নমঃ ইতি পূর্ব্ববৎ সংপূজ্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ
স্বর্গকাম ইদং সাচ্ছাদন তৈজসাধার জলং শ্রী বিষ্ণুদৈবতমিত্যাদিনা উৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। যথা ওঁ অদ্যেত্যাদি কৃতৈতৎ

স্বাচ্ছাদন তৈজসাধার জলদানকর্ম্মণঃ সাঙ্গতার্থমিতি ॥ ৩ ॥ বস্ত্রস্য বৃহস্পতির্দ্দেবতা চন্দ্রমালোকপ্রাপ্তিঃ ফলম্। বাক্যন্তু এতে
গন্ধপুষ্পে ওঁ সাচ্ছাদন বস্ত্রায় নমঃ ইতি পূর্ব্ববৎ সংপূজ্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ স্বর্গকাম ইদং
সাচ্ছাদন বস্ত্রং বিষ্ণুদৈবতমিত্যাদিনা উৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। ওঁ অদ্যেত্যাদি কৃতৈতৎ সাচ্ছাদন বস্ত্রদান কর্ম্মণঃ সাঙ্গতার্থমিতি ॥ ৪ ॥
দীপস্য বিষ্ণুর্দ্দেবতা উত্তম চক্ষুঃপ্রাপ্তিঃ ফলম্। বাক্যন্তু এতে গন্ধপুষ্পে ওঁ সাচ্ছাদন লৌহযষ্টিক তাম্রাধার রজতবর্ত্তি দীপায় নমঃ।
ইতি পূর্ব্ববৎ সংপূজ্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবর্ম্মণঃ স্বর্গকাম ইদং সাচ্ছাদন লৌহযষ্টিক তাম্রাধার রজত-
বর্ত্তি দীপং বিষ্ণুদৈবতমিত্যাদিনা উৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। যথা ওঁ অদ্যেত্যাদি কৃতৈতৎ সাচ্ছাদন লৌহযষ্টিক তাম্রাধার রজত-
বর্ত্তি দীপদানকর্ম্মণঃ সাঙ্গতার্থমিতি ॥ ৫ ॥ অন্নস্য প্রজাপতির্দ্দেবতা অক্ষয় তৃপ্তিঃ ফলম্। বাক্যন্তু এতে গন্ধপুষ্পে ওঁ সাচ্ছাদন 
তৈজসাধারান্নায় নমঃ। ইতি পূর্ব্ববৎ সংপূজ্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ স্বর্গকাম ইদং সাচ্ছাদন-
তৈজসাধারান্নং বিষ্ণুদৈবতমিত্যাদিনা উৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। যথা ওঁ অদ্যেত্যাদি কৃতৈতৎ সাচ্ছাদন তৈজসাধারান্ন দানকর্ম্মণঃ
সাঙ্গতার্থমিতি ॥ ৬ ॥ তাম্বূলস্য বৃহস্পতির্দ্দেবতা মেধাবিত্ব সুভগত্ব প্রজ্ঞত্ব দর্শনীয়ত্ব প্রাপ্তিঃ ফলম্। বাক্যন্তু এতে গন্ধপুষ্পে
সাচ্ছাদন তৈজসাধার তাম্বূলায় নমঃ। ইতি পূর্ব্ববৎ সংপূজ্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ স্বর্গকাম ইদং
সাচ্ছাদন তৈজসাধার তাম্বূলং বিষ্ণুদৈবতমিত্যাদিনা উৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। যথা অদ্যেত্যাদি কৃতৈতৎ সাচ্ছাদন তৈজসাধার
তাম্বূলদানকর্ম্মণঃ সাঙ্গতার্থমিতি ॥ ৭ ॥ ছত্রস্য উত্তানাঙ্গিরো দেবতা সর্ব্বব্যাধিবিমুক্তিত্ব শ্রীমত্ত্ব বহুপুত্রত্ব প্রাপ্তিঃ ফলম্। বাক্যন্তু

এতে গন্ধপুষ্পে ওঁ সাচ্ছাদন ছত্রায় নমঃ। ইতি পূর্ব্ববৎ সংপূজ্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ স্বর্গ কাম ইদং সাচ্ছাদন ছত্রং বিষ্ণুদৈবতমিত্যাদিনা উৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। যথা অদ্যেত্যাদি কৃতৈতৎ সাচ্ছাদন ছত্রদান কর্ম্মণঃ সাঙ্গতার্থমিতি ॥ ৮ ॥ গন্ধস্য গন্ধর্ব্বো দেবতা ব্রহ্মপদপ্রয়াণং ফলম্। বাক্যন্তু এতে গন্ধপুষ্পে ওঁ সাচ্ছাদন তৈজসাধার গন্ধায় নমঃ ইতি পূর্ব্ববৎ সংপূজ্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ স্বর্গকাম ইমং সাচ্ছাদন তৈজসাধার গন্ধং বিষ্ণুদৈবতমিত্যাদিনা উৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। যথা ওঁ অদ্যেত্যাদি কৃতৈতৎ সাচ্ছাদন তৈজসাধার গন্ধদানকর্ম্মণঃ সাঙ্গতার্থমিতি ॥ ৯ ॥ মাল্যস্য বনস্পতির্দ্দেবতা অত্যন্ত সুখিত্বং ফলম্। বাক্যন্তু এতে গন্ধপুষ্পে ওঁ সাচ্ছাদন তৈজসাধার মাল্যায় নমঃ। ইতি পূর্ব্ববৎ সংপূজ্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ স্বর্গকাম ইদং সাচ্ছাদন তৈজসাধার মাল্যং বিষ্ণুদৈবতমিত্যাদিনা উৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। যথা ওঁ অদ্যেত্যাদি কৃতৈতৎ সাচ্ছাদন তৈজসাধার মাল্যদানকর্ম্মণঃ সাঙ্গতার্থমিতি ॥ ১০ ॥ ফলস্য প্রজাপতির্দ্দেবতা মুদাযুক্তত্বং ফলম্। বাক্যন্তু এতে গন্ধপুষ্পে ওঁ সাচ্ছাদন তৈজসাধার ফলায় নমঃ। ইতি পূর্ব্ববৎ সংপূজ্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ স্বর্গকাম ইদং সাচ্ছাদন তৈজসাধার ফলং বিষ্ণুদৈবতমিত্যাদিনা উৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। যথা ওঁ অদ্যেত্যাদি কৃতৈতৎ সাচ্ছাদন তৈজসাধার ফলদান কর্ম্মণঃ ॥ ১১ ॥ শয্যায়া উত্তানাঙ্গিরো দেবতা অত্যন্ত সুখিত্ব ভবনং ফলম্। বাক্যন্তু এতে গন্ধপুষ্পে ওঁ সাচ্ছাদনায়ৈ শয্যায়ৈ নমঃ ইতি পূর্ব্ববৎ সংপূজ্য। ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ স্বর্গকাম ইমাং সাচ্ছাদনাং শয্যাং বিষ্ণুদেবতাকাং ইত্যাদিনা উৎসৃজ্য

দক্ষিণাং কুর্য্যাৎ। যথা ওঁ অদ্যেত্যাদি কৃতৈতৎ সাচ্ছাদন শয্যাদানকর্ম্মণঃ সাঙ্গতার্থমিতি ॥ ১২ ॥ পাদুকাযুগলস্য উত্তানাঙ্গিরো দেবতা স্বর্গলোকসুখগমনং ফলম্। বাক্যন্তু এতে গন্ধপুষ্পে ওঁ সাচ্ছাদন পাদুকাযুগলায় নমঃ। ইতি পূর্ব্ববৎ সংপূজ্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ স্বর্গকাম ইদং সাচ্ছাদন পাদুকাযুগলং বিষ্ণুদৈবতমিত্যাদিনা উৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। যথা ওঁ অদ্যেত্যাদি কৃতৈতৎ সাচ্ছাদন পাদুকাযুগলদানকর্ম্মণঃ সাঙ্গতার্থমিতি ॥ ১৩ ॥ ধেনোরুদ্রো দেবতা সূর্য্যলোক প্রাপ্তিঃ ফলম্। তত্র ধেনুং প্রাঙ্মুখীং আত্মসম্মুখমানীয় ওঁ যা লক্ষ্মীঃ সর্ব্বভূতানাং যা চ দেবেষ্ববস্থিতা। ধেনুরূপেণ সা দেবী মম শান্তিং প্রযচ্ছ তু। ওঁ দেবস্থা যা চ রুদ্রাণী শঙ্করস্য চ যা প্রিয়া। ধেনুরূপেণ সা দেবী মম শান্তিং প্রযচ্ছ তু। ওঁ বিষ্ণোর্বক্ষসি যা লক্ষ্মীর্যা লক্ষ্মীর্ধনদস্যচ। যা লক্ষ্মীঃ সর্ব্বভূতানাং সা ধেনুর্ব্বরদাস্তু মে। চতুর্ম্মুখস্য যা লক্ষ্মীঃ স্বাহা যা চ বিভাবসোঃ। চন্দ্রার্কশক্রলক্ষ্মীর্যা ধেনুরূপাস্তু সা শ্রিয়ে। ওঁ স্বধা ত্বং পিতৃসংঘানাং স্বাহা হব্যভুজাং যতঃ। সর্ব্বপাপহরা ধেনুস্তস্মাচ্ছান্তিং প্রযচ্ছ মে। ওঁ সর্ব্বদেবময়ীং দেবীং সর্ব্বদেবময়ীন্তথা। সর্ব্বলোকনিমিত্তায় সর্ব্বলোকমপি স্থিরম্। প্রযচ্ছামি মহাভাগামক্ষয়ায় শুভায়তামিত্যুচ্চার্য্য কুশত্রয়তিলজলান্যাদায়। বাক্যন্তু এতে গন্ধপুষ্পে ওঁ সাচ্ছাদন ধেনবে নমঃ। অথবা গোমূল্যায় নমঃ। ইতি পূর্ব্ববৎ সংপূজ্য। ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ স্বর্গকাম ইমাং সাচ্ছাদন ধেনুং ইদং সাচ্ছাদন গোমূল্যং বা বিষ্ণুদেবতাকাং বিষ্ণুদৈবতং বা ইত্যাদিনা উৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। যথা ওঁ অদ্যেত্যাদি কৃতৈতৎ সাচ্ছাদন ধেনুদানকর্ম্মণঃ গোমূল্য দানকর্ম্মণো বা সাঙ্গতার্থমিতি ॥ ১৪ ॥ হিরণ্যস্যাগ্নির্দেবতা দীর্ঘায়ুঃপ্রাপ্তিঃ ফলম্। বাক্যন্তু

এতে গন্ধপুষ্পে ওঁ সাচ্ছাদন কাঞ্চনায় নমঃ। ইতি পূর্ব্ববৎ সংপূজ্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ স্বর্গ-
কাম ইদং সাচ্ছাদন কাঞ্চনং বিষ্ণুদৈবতমিত্যাদিনা উৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। যথা ওঁ অদ্যেত্যাদি কৃতৈতৎ সাচ্ছাদন কাঞ্চন-
দানকর্ম্মণঃ সাঙ্গতার্থমিতি ॥ ১৫ ॥ রজতস্য চন্দ্রো দেবতা উত্তম রূপপ্রাপ্তিঃ ফলম্। বাক্যস্তু। এতে গন্ধপুষ্পে ওঁ সাচ্ছাদন রজতায়
নমঃ। ইতি পূর্ব্ববৎ সংপূজ্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ স্বর্গকাম ইদং সাচ্ছাদন রজতং বিষ্ণুদৈবত-
মিত্যাদিনা উৎসৃজ্য দক্ষিণাং কুর্য্যাৎ। যথা ওঁ অদ্যেত্যাদি কৃতৈতৎ সাচ্ছাদন রজত দানকর্ম্মণঃ সাঙ্গতার্থমিতি। ওঁ অদ্যেত্যাদি
কৃতৈতৎ ষোড়শ দানকর্ম্মাচ্ছিদ্রমস্ত্বিতি অচ্ছিদ্রাবধারয়েৎ ॥ ১৬ ॥ এবমন্যান্যপি তত্তৎ কামেন দেয়ানি। অত্র চ জলাদি
মাত্রদানে তত্তৎফলং। তৈজস পাত্র দানে তু বহুকামপাত্রীভবনং ফলং ন তু জলাদিযুক্ত তৈজসপাত্রদানে বিশিষ্য ফলমুক্তং।
ততশ্চ নানাবিধানি দ্রব্যানি ধনানি বিবিধানি চ। আয়ুষ্কামেন দেয়ানি স্বর্গমক্ষয়মিচ্ছতা। ইতি যমদেবলবচনাৎ অক্ষয় স্বর্গ- 
কামনৈয়েব পাত্রযুক্ত তথাবিধ দ্রব্যদানযুক্তং তথৈবস্তুতদানে বিষ্ণুদৈবতং বক্তুমুচিতং তজ্জেজ্ঞয়ং বিষ্ণুদৈবতং। সর্ব্বং বা বিষ্ণু-
দৈবতং। ইতি বিষ্ণুধর্ম্মোত্তরীয়াৎ। ততো বিলক্ষণাং শয্যাং দদ্যাৎ। তত্র স্বর্গপ্রাপ্তিঃ ফলং। তত্র প্রয়োগঃ। যথা ফলবস্ত্র-
সমন্বিতং কাঞ্চনপুরুষং শয্যায়ামারোপ্য ওঁ সাচ্ছাদন ফলবস্ত্রসহিত কাঞ্চনপুরুষাদ্যুপকরণসহিত বিলক্ষণ শয্যায়ৈ নমঃ। ইতি
ত্রিঃ সংপ্রোক্ষ্য ত্রিঃ সংপূজ্য তদধিপতিং বিষ্ণুং সংপূজ্য সম্প্রদান দ্বিজদম্পতী চ নানাভরণভূষিতৌ কৃত্বা এতৎ সম্প্রদানাভ্যাং
দ্বিজদম্পতীভ্যাং নমঃ ইত্যভ্যর্চ্চ বিষ্ণুং স্মৃত্বা ওঁ তৎসদিত্যুচ্চার্য্য ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো হংসৌ-

চান্দ্রাদ্দ্বিতীয়ে হহ্নি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো হক্ষর স্বর্গপ্রাপ্তি কামঃ ইমাং সাচ্ছাদন ফলবস্ত্রসহিতারোপিত কাঞ্চন-পুরুষাদ্যুপকরণসহিত বিলক্ষণ শয্যাং বিষ্ণুদেবতাকাং অমুক গোত্রাভ্যাং শ্রী দেবদত্তা দেবী শ্রী যজ্ঞদত্ত শর্ম্মভ্যাং নানাভরণ-ভূষিতাভ্যামর্চ্চিতাভ্যাং দ্বিজদম্পতিভ্যাং যুবাভ্যামহং সম্প্রদদানীত্যনিরুদ্ধভট্টপ্রভৃতীনাং স্বরসসিদ্ধং বাক্যং। ততো দ্বিজ ওঁ স্বস্তীতি ব্রূয়াৎ দ্বিজপত্নী তু নমো বাঢ়মিতি। ততস্তস্যাং তাবুপবেশয়েৎ। ততো দ্বিজঃ সাবিত্রীং কামস্তুতিঞ্চ পঠেৎ। কর্ম্মকারয়িত্রা পাঠ্যমানায়াং কামস্তুতৌ দ্বিজপত্নী নমো নম ইতি ব্রূয়াৎ। ততো দক্ষিণাং দদ্যাৎ॥ * ॥ ইতি দানপদ্ধতিঃ॥

অথ ষোড়শপিণ্ডদানপ্রয়োগঃ॥ * ॥ সম্বৎসর প্রদীপে অমাবস্যাস্তু কন্যার্কে তীর্থপ্রাপ্তৌ তথানৃপ। শ্রাদ্ধং কৃত্বা বিধানেন দদ্যাৎ ষোড়শ পিণ্ডকমিতি বায়ুপুরাণীয়াৎ। তৎপ্রয়োগো যথা। ঊনবিংশতি দাস্যমান পিণ্ডস্থানানি যদা প্রদক্ষিণং ভাগচতুষ্টয়েন কৃত্বা তানি তত্র নিহন্মীতি মন্ত্রং রেখাঞ্চ কৃত্বা দক্ষিণাগ্রান্ কুশানাস্তীর্য্য ওঁ অস্মৎকুলে মৃতা যে চ গতির্যেষাং ন বিদ্যতে। আবাহয়িষ্যে তান্ সর্ব্বান্ দর্ভপৃষ্ঠে তিলোদকৈঃ। ওঁ মাতামহকুলে যে চ গতির্যেষাং ন বিদ্যতে। আবাহয়িষ্যে তান্ সর্ব্বানিতি। ওঁ বন্ধুবর্গকুলে যে চ গতির্যেষাং ন বিদ্যতে। আবাহয়িষ্যে তান্ সর্ব্বানিতি। ইত্যেতৈস্ত্রৈর্মন্ত্রৈরাবাহ্য ওঁ আব্রহ্মস্তম্বপর্য্যন্তং দেবর্ষিপিতৃমানবাঃ। তৃপ্যন্তু পিতরঃ সর্ব্বে মাতৃমাতামহাদয়ঃ। অতীত কুলকোটীনাং সপ্তদ্বীপনিবাসিনাম্। আব্রহ্মভুবনাল্লোকাদিদমস্তু তিলোদকমিতি। আভ্যাং সতিল জলাঞ্জলীন্ দদ্যাৎ। ততো মূলাদিতঃ পিতৃতীর্থেন দক্ষিণামুখঃ পিণ্ডান্ দদ্যাৎ। তত্র ক্রমঃ। ওঁ অস্মৎ কুলে মৃতা যে চ গতির্যেষাং ন বিদ্যতে। তেষামুদ্ধরণার্থায়

ইমং পিণ্ডং দদাম্যহম্ ॥ ১ ॥ ওঁ মাতামহকুলে যে চ গতির্যেষাং ন বিদ্যতে। তেষামিত্যাদি ॥ ২ ॥ ওঁ বন্ধুবর্গকুলে যে চ গতির্যেষাং ন বিদ্যতে। তেষামিত্যাদি ॥ ৩ ॥ ওঁ অজাতদন্তা যে কেচিৎ যে চ গর্ভে প্রপীড়িতাঃ। তেষামিত্যাদি ॥ ৪ ॥ ওঁ অগ্নিদগ্ধাশ্চ যে কেচিৎ নাগ্নিদগ্ধাস্তথাপরে। বিদ্যুচ্চৌরহতা যে চ তেভ্যঃ পিণ্ডং দদাম্যহম্ ॥ ৫ ॥ ওঁ দাবদাহে মৃতা যে চ সিংহব্যাঘ্রহতাশ্চ যে। দংষ্ট্রিভিঃ শৃঙ্গিভির্ব্বাপি তেভ্য ইত্যাদি ॥ ৬ ॥ ওঁ উদ্বন্ধনমৃতা যে চ বিষশস্ত্রহতাশ্চ যে আত্মোপঘাতিনো যে চ তেভ্য ইত্যাদি ॥ ৭ ॥ অরণ্যে বর্ত্মনি বনে ক্ষুধয়া তৃষয়া হতাঃ। ভূতপ্রেতপিশাচাশ্চ তেভ্য ইত্যাদি ॥ ৮ ॥ ওঁ রৌরবে চান্ধতামিস্রে কালসূত্রে চ যে স্থিতাঃ। তেষামিত্যাদি ॥ ৯ ॥ অনেক যাতনাসংস্থাঃ প্রেতলোকে চ যে গতাঃ। তেষামিত্যাদি ॥ ১০ ॥ ওঁ অনেক যাতনাসংস্থা যে নীতা যমকিঙ্করৈঃ। তেষামুদ্ধরণার্থায় ইমং পিণ্ডং দদাম্যহম্ ॥ ১১ ॥ ওঁ নরকেষু সমস্তেষু যাতনাসু চ যে স্থিতাঃ। তেষামিত্যাদি ॥ ১২ ॥ ওঁ পশুযোনিগতা যে চ পক্ষিকীটসরীসৃপাঃ। অথবা বৃক্ষযোনিস্থাস্তেভ্য ইত্যাদি ॥ ১৩ ॥ জাত্যন্তরসহস্রেষু ভ্রমন্তঃ স্বেন কর্ম্মণা মানুষ্যং দুর্ল্লভং যেষাং তেভ্য ইত্যাদি ॥ ১৪ ॥ ওঁ দিব্যন্তরীক্ষা ভূমিষ্ঠাঃ পিতরো বান্ধবাদয়ঃ। মৃতা অসংস্কৃতা যে চ তেভ্য ইত্যাদি ॥ ১৫ ॥ ওঁ যে কেচিৎ প্রেতরূপেণ বর্ত্তন্তে পিতরো মম। তে সর্ব্বে তৃপ্তিমায়ান্তু পিণ্ডদানেন সর্ব্বদা ॥ ১৬ ॥ ওঁ যে বান্ধবা বান্ধবা বা যে হন্যজন্মনি বান্ধবাঃ। তেষাং পিণ্ডো ময়া দত্তো হ্যক্ষয্যমুপতিষ্ঠতাং ॥ ১৭ ॥ ওঁ পিতৃবংশে মৃতা যে চ মাতৃবংশে চ যে মৃতাঃ। গুরুশ্বশুরবন্ধূনাং যে চান্যে বান্ধবা মৃতাঃ। যে যে কুলে লুপ্তপিণ্ডাঃ পুত্রদারবিবর্জ্জিতাঃ। ক্রিয়ালোপগতা যে চ জাত্যন্ধাঃ পঙ্গবস্তথা। বিরূপা আমগর্ভাশ্চ

জ্ঞাতাজ্ঞাতাঃ কুলে মম। তেষাং পিণ্ডো ময়া দত্তোঽপ্যক্ষয্যমুপতিষ্ঠতাম্॥ ১৮ ॥ ওঁ আব্রহ্মণো যে পিতৃবংশজাতা মাতুস্তথা বংশভবা মদী-
য়াঃ। কুলদ্বয়ে যে মম দাসভূতা ভৃত্যাস্তথৈবাশ্রিতসেবকাশ্চ। মিত্রাণি সখ্যঃ পশবশ্চ কীটা দৃষ্টাশ্চাদৃষ্টাশ্চ কৃতোপকারাঃ। জন্মান্তরে যে
মম দাসভূতাস্তেভ্যঃ স্বধা পিণ্ডমহং দদামি। অত্রোনবিংশতি পিণ্ডে ষোড়শ পিণ্ডকং পারিভাষিকং পঞ্চত্রয়বৎ। ইতি ষোড়শপিণ্ডদানং ॥ * ॥
অথ ছন্দোগানাং বৃষোৎসর্গপদ্ধতিঃ ॥ * ॥ গোশালায়াং পুণ্যভূমৌ বা প্রাগুদকপ্লবনং দেশং গোময়েনোপলিপ্য দ্রব্যা-
ণ্যাসাদয়েৎ। তানি যথা। মণ্ডপং ১। তদন্তর্বিতানং ১। পঞ্চগব্যং ১। ঘটাঃ ৫। ঘটাচ্ছাদনবস্ত্রাণি ১। গণেশগ্রহবিষ্ণুপূজাষোড়শোপ-
চারদ্রব্যাণি ১। বৃষঃ ১। লোহিতনীলপাণ্ডরকৃষ্ণ বৎসতর্য্যঃ। বৃষস্য কাঞ্চনশৃঙ্গে ১। কাঞ্চনবীরপট্টকং ১। রজতখুরাঃ৪। দর্পণং ১। লৌহ-
ঘণ্টা ১। তাম্রপৃষ্ঠং ১। কাংস্যক্রোড়ং ১। লৌহনূপুরচতুষ্টয়ং ৪। চামরং ২। মুকুটং ১। আচ্ছাদনার্থং বস্ত্রযুগং ২। বন্ধনার্থং বস্ত্রমেকং ১
বৎসতরীবন্ধনার্থং বস্ত্রচতুষ্টয়ং৪। তদলঙ্করণানি১। তদশক্তৌ কাংস্যক্রোড়চতুষ্টয়ং৪। সোপকরণপেটিকাচতুষ্টয়ং৪। সিন্দূরাদি অঙ্কনার্থং
কুঙ্কুমং ১। অভাবে হরিদ্রা ১। দণ্ডোৎপলদণ্ডঃ১। লৌহবিদাহঃ ২। স্নানার্থং মুরামাংসী বচাকুষ্ঠং শৈলেয়ং রজনীদ্বয়ম্। শঠীচম্পকমুস্তঞ্চ
সর্ব্বৌষধিগণঃ স্মৃতঃ। ইত্যুক্তমিলিত দ্রব্যাণি ২। স্নানার্থং কলসদ্বয়ং ১। বরুণকাষ্ঠনির্ম্মিতমুদূখলং ১। মূষলঞ্চ ১। জলধারার্থং চমসং ১।
ঔড়ুম্বরসমিধঃ ১। কুশাঃ ১। তিলাঃ ১। অস্মিন্ন ধান্যতণ্ডুলাঃ১। ব্রহ্মবরণার্থং বস্ত্রযুগং২। অঙ্গুরীয়কং১। আসনং১। গন্ধপুষ্পতাম্বূলানি১
অন্যহোতৃপক্ষে তদ্বরণার্থমেতান্যন্যানি চ। আচার্য্যসদস্য বরণার্থমপ্যেতান্যন্যানি চ ১। গোপালকবস্ত্রং ১। বিল্ববৃক্ষযূপঃ ১। উপযূপ-
চতুষ্টয়ং ৪। যূপাচ্ছাদনং ১। ব্রহ্মদক্ষিণার্থং পূর্ণপাত্রং ১। কাঞ্চনঞ্চ ১। হোতৃদক্ষিণা কাঞ্চনবস্ত্রযুগকাংস্যানি ১। আচার্য্যার্থং বৃষোৎসর্গ-

দক্ষিণা গৌস্তন্মূল্যং বা ১। স্ত্রিয়া বৃষোৎসর্গে ধেনুর্ব্বয়স্কা দক্ষিণা ১। পুরুষস্য তু বৃষস্তন্মূল্যং বা। ততঃ কৃতনিত্যক্রিয়ঃ পবিত্র-
পাণিরাচান্তঃ প্রাঙ্মুখঃ কুশযুক্তাসনে উপবিশ্য উত্তরামুখং ব্রাহ্মণত্রয়মুপবিশ্য গন্ধাদিনা পরিতোষ্য অস্মিন্ বৃষোৎসর্গকর্ম্মণি
পুণ্যাহং ভবন্তো ব্রুবন্তু ইতি ত্রিঃ শ্রাবয়েৎ। পুণ্যাহমিতি তে ত্রির্ব্রূয়ুঃ। ততঃ অস্মিন্ বৃষোৎসর্গকর্ম্মণি ওঁ স্বস্তি ভবন্তো ব্রুবন্তু
ইতি ত্রিঃ শ্রাবয়েৎ। ওঁ স্বস্তি ইতি তে ত্রির্ব্রূয়ুঃ। ততঃ অস্মিন্ বৃষোৎসর্গকর্ম্মণি ওঁ ঋদ্ধিং ভবন্তো ব্রুবন্তু ইতি ত্রিঃ শ্রাবয়েৎ।
ওঁ ঋদ্ধ্যতামিতি তে ত্রির্ব্রূয়ুঃ। ততঃ ওঁ স্বস্তি ন ইন্দ্রো বৃদ্ধশ্রবাঃ স্বস্তি নঃ পূষা বিশ্ববেদাঃ স্বস্তি নস্তার্ক্ষ্যোঽরিষ্টনেমিঃ স্বস্তি নো বৃহ-
স্পতির্দধাতু। ইত্যনেনাক্ষতান্ প্রক্ষিপ্য ওঁ সূর্য্যঃ সোমো যমঃ কালঃ সন্ধ্যে ভূতান্যহঃ ক্ষপা। পবনো দিক্পতির্ভূমিরাকাশং
খচরামরাঃ। ব্রাহ্মং শাসনমাস্থায় কল্পধ্বমিহ সন্নিধিমিতি পঠিত্বা ওঁ তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সূরয়ঃ। দিবীব 
চক্ষুরাততমিত্যনেন বিষ্ণুং স্মৃত্বা উদঙ্মুখঃ কুশতিলজলান্যাদায় ওঁ তৎসদিত্যুচ্চার্য্য অদ্যামুকে মাসি অমুক পক্ষেঽমুক তিথৌ অমুক
গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণোঽশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ প্রেতলোক পরিত্যাগপূর্ব্বক স্বর্গ-
লোক গমনকামঃ সোপকরণ বৎসতরীচতুষ্টয়সহিত বৃষোৎসর্গমহং করিষ্যামি। ততো দেবো ব ইতি পঠেৎ। স্বার্থশ্চেৎ করিষ্যে
ইতি বিশেষঃ। অন্যকালীনান্যোদ্দেশ্য বৃষোৎসর্গে যথাযোগ্যমূহনীয়ম্। প্রেতেতর বৃষোৎসর্গে তু বৃদ্ধিশ্রাদ্ধং কর্ত্তব্যম্।
ততঃ ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণোঽশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রস্য প্রেতস্যামুক দেব-
শর্ম্মণো মৎসঙ্কল্পিত বৃষোৎসর্গাঙ্গ হোমীয় হবিরক্ষয়ত্ব কামো মহাভারতনামোচ্চারণমহং করিষ্যে ইতি সংকল্প্য ওঁ মহা-

ভারতমিতি বদেৎ। অথ রাঢ়দেশীয়া বিরাটপর্ব্ব পাঠয়ন্তি। তত্র ওঁ অদ্যামুকে মাস্যমুক পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য প্রেতস্যামুক
দেবশর্ম্মণো ঽশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো মৎসঙ্কল্পিত বৃষোৎসর্গাঙ্গ হোমীয় হবিরক্ষয়ত্ব কামঃ শ্রী
কৃষ্ণদ্বৈপায়নাভিধান মহর্ষিবেদব্যাসপ্রোক্ত জয়াখ্য শতসাহস্র মহাভারতান্তর্গত জনমেজয় উবাচ, কথং বিরাটনগরে মম পূর্ব্বপিতামহা
ইত্যাদি নগরং মৎস্যরাজস্য সুশুভে ভরতর্ষভ ইত্যন্তং বিরাটপর্ব্ব সকৃৎপাঠকর্ম্মাহং করিষ্যে ইতি সঙ্কল্প্য ব্রাহ্মণান্ ব্রূয়াৎ। যথা
উত্তরামুখং ব্রাহ্মণমুপবেশ্য তৎসমীপে আসনমানীয় প্রাঙ্মুখো যজমানঃ পুটাঞ্জলির্বদেৎ। ওঁ সাধুভবানাস্তামিতি। ওঁ সাধ্বহমাসে
ইতি প্রতিবচনং দত্বা তদাসনে উপবিশতি। ততো যজমানঃ ওঁ অর্চ্চয়িষ্যামো ভবন্তং ইতি বদেৎ। ওঁ অর্চ্চয়েতি প্রতিবচনম্।
ততো গন্ধপুষ্পাদিভিরভ্যর্চ্চ্য দক্ষিণং জানু ধৃত্বা ওঁ অদ্যামুকে মাসি অমুক পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য প্রেতস্যামুক দেব-
শর্ম্মণো ঽশৌচান্তাদ্দ্বিতীয়েঽহ্নি মৎসঙ্কল্পিত বৃষোৎসর্গ হোমকর্ম্মণি ব্রহ্মকর্ম্মকরণায়ামুক গোত্রং শ্রী অমুক দেবশর্ম্মাণমেভি-
র্গন্ধাদিরভ্যর্চ্চ্য ভবন্তমহং বৃণে। ইতি বদেৎ। ওঁ বৃতোঽস্মীতি প্রতিবচনম্। ততঃ ওঁ যথাবিহিতং ব্রহ্ম কর্ম্ম কুরু ইতি বদেৎ।
ওঁ যথাজ্ঞানং করবাণীতি প্রতিবচনম্। স্বয়ং গানাশক্তৌ ব্রহ্মকর্ম্ম করণায়েত্যত্র ব্রহ্মাদিকর্ম্ম করণায়েতি বদেৎ। স্বয়ং হোমা-
সামর্থ্যে হোতারং এবং ব্রূয়াৎ। তত্র ওঁ অদ্যেত্যাদি হোমকর্ম্মণ্যস্তমুচ্চার্য্য হোতৃকর্ম্মকরণায়েতি বিশেষঃ। এবমাচার্য্যবরণং
সদস্যবরণমপি তত্রাপি পূর্ব্ববদুচ্চার্য্য কর্ম্মকরণায়েতি বিশেষঃ। আচার্য্যস্তু পুস্তকমাদায় কর্ম্মোপদিশেৎ। আচার্য্যান্ত-
রাভাবে ব্রহ্মৈবাচার্য্যত্বেন বরণীয়ঃ। তত্র ব্রহ্মাচার্য্যাদি কর্ম্মকরণায়েতি বিশেষঃ। ততঃ ওঁ অদ্যামুকে মাসি অমুক পক্ষেঽমুক-

তিথৌ অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণোঽশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ মৎসঙ্কল্পিত বৃষোৎ-
সর্গাঙ্গহোমীয় হবিরক্ষয়ত্বকামঃ শ্রী কৃষ্ণদ্বৈপায়নাভিধান মহর্ষি বেদব্যাসপ্রোক্ত জয়াখ্য মহাভারতান্তর্গত জনমেজয় উবাচ কথং
বিরাটনগরে মম পূর্ব্বপিতামহা ইত্যাদি শুশুভে মৎস্যরাজস্য নগরং ভরতর্ষভ ইত্যন্তং বিরাটপর্ব্বপাঠনা কর্ম্মণি পাঠকর্ম্ম করণায়
অমুক গোত্রং শ্রী অমুক দেবশর্ম্মাণমেভির্গন্ধাদিভিরভ্যর্চ্চ্য ভবন্তমহং বৃণে ইতি বদেৎ। ওঁ বৃতোঽস্মীতি প্রতিবচনম্। ওঁ যথা
বিহিতং পাঠ কর্ম্ম কুরু ইতি বদেৎ। ওঁ যথাজ্ঞানং করবাণীতি প্রতিবচনম্। ততো যজমানো হোতা বা সঞ্চগব্যং শোধ-
য়িত্বা বেদীমভ্যুক্ষ্য তত্র ঘটান্ সংস্থাপ্য গণেশং নবগ্রহান্ বিষ্ণুঞ্চ ষোড়শোপচারেণ পূজয়েৎ। ততো হস্তপ্রমাণং স্থণ্ডিলং
শর্করাঙ্গারাস্থিকেশতুষারাদিরহিতং পূর্ব্বোত্তরপ্লবং সমং বা গোময়েনোপলিপ্য উত্তরস্যাং দিশ্যভ্যুক্ষণার্থং কুশকুসুমসহিতং জল- ২৭৫
পূর্ণ পাত্রং নিধায় দক্ষিণং জানু ভূমৌ পাতয়িত্বা সব্যহস্তপ্রাদেশং উত্তরাগ্রকুশোপরি বহ্নিস্থাপনপর্য্যন্তং ভূমৌ নিধায়, দক্ষিণ-
হস্তগৃহীতকুশমূলেন স্থণ্ডিলদক্ষিণপ্রান্তে দ্বাদশাঙ্গুলপ্রমাণাং প্রাগগ্রাং পৃথ্বীদেবতাকাং রেখামুল্লিখ্য পীতবর্ণাং ধ্যায়েৎ। যথা
ওঁ রেখেয়ং পৃথ্বীদেবতাকা পীতবর্ণাসি ততস্তন্মূলতঃ প্রভৃত্যেকবিংশত্যঙ্গুলপ্রমাণামুদগগ্রাং অগ্নিদেবতাকাং রেখামুল্লিখ্য
লোহিতবর্ণাং ধ্যায়েৎ। ওঁ রেখেয়ং অগ্নিদেবতাকা লোহিতবর্ণাসি তত উত্তরাগ্ররেখালগ্নাং প্রথমরেখাতঃ সপ্তাঙ্গুলা-
ন্তরিতাং প্রাগগ্রাং প্রাদেশপ্রমাণাং প্রজাপতিদেবতাকাং রেখামুল্লিখ্য কৃষ্ণবর্ণাং ধ্যায়েৎ। যথা ওঁ রেখেয়ং প্রজাপতি-
দেবতাকা কৃষ্ণবর্ণাসি ততোঽপি সপ্তাঙ্গুলান্তরিতাং প্রাদেশপ্রমাণাং প্রাগগ্রামিন্দ্রদেবতাকাং রেখামুল্লিখ্য নীলবর্ণাং ধ্যায়েৎ।

যথা রেখেয়মিন্দ্রদেবতাকা নীলবর্ণাসি ততোঽপি সপ্তাঙ্গুলমন্তরিতাং প্রাদেশমিতাং প্রাগগ্রাং সোমদেবতাকাং রেখামুল্লিখ্য শুক্লবর্ণাং ধ্যায়েৎ। যথা ওঁ রেখেয়ং সোমদেবতাকা শুক্লবর্ণাসি। ততো ঽঙ্গুষ্ঠতর্জ্জনীভ্যামুল্লেখক্রমেণ রেখাপাংশুংকরং গৃহীত্বা ঐশান্যাং দিশ্যরত্নিমাত্রান্তরিতে দেশে ওঁ নিরস্তঃ পরাবসুরিত্যনেন নিক্ষিপ্য পূর্ব্বস্থাপিত জলেন রেখামভ্যুক্ষ্য দক্ষিণ-দিকস্থ কাংস্যাতাম্রনবশরাবান্যতমস্থাদগ্নের্জ্জ্বলদিন্ধনং গৃহীত্বা প্রজাপতির্ঋষিস্ত্রিষ্টুপ্‌ছন্দো ঽগ্নির্দেবতা অগ্নিসংস্কারে বিনিয়োগঃ। ওঁ ক্রব্যাদমগ্নিং প্রহিণোমি দূরং যমরাজ্যং গচ্ছতু রিপ্রবাহঃ। ইত্যনেন দক্ষিণস্যাং দিশি নিরস্যাপরাগ্নিং গৃহীত্বা প্রজাপতি-ঋষির্বৃহতীচ্ছন্দঃ প্রজাপতির্দেবতা অগ্নিস্থাপনে বিনিয়োগঃ ওঁ ভূর্ভুবঃ স্বরোঁ ইত্যনেনৈব পাত্রেণাত্মাভিমুখমগ্নিং তৃতীয় রেখো-পরি স্থাপয়েৎ। ততো বামহস্তমুত্তোল্যাঞ্জলিং বদ্ধা পঠেৎ। ওঁ সর্ব্বতঃ পাণিপাদান্তঃ সর্ব্বতো ঽক্ষিশিরো মুখঃ। বিশ্বরূপো- 
মহানগ্নিঃ প্রণীতঃ সর্ব্বকর্ম্মসু ইতি মন্ত্রং পঠিত্বা অগ্নে ত্বং সাহসনামাসীতি নাম কৃত্বা ওঁ ইহৈবায়মিতরো জাতবেদা দেবেভ্যো হব্যং বহতু প্রজানন্ ইতি পঠিত্বা প্রাদেশমিতাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা ধারাসহিতমুদকপাত্রং গৃহীত্বা প্রদক্ষিণে-নাগ্নের্দক্ষিণে ঽরত্নিমাত্রান্তরিতে দেশে গত্বা প্রাগগ্রাং বারিধারাং দত্বা তস্যাং প্রাগগ্রান্ কুশানাস্তীর্য্য প্রাঙ্মুখো যজমানস্তিষ্ঠেৎ। ততো ব্রহ্মা পূর্ব্বদিগ্‌ভাগে প্রাঙ্মুখো ঽনুপবিষ্টো বামহস্তানামিকাঙ্গুষ্ঠাভ্যাং যজমানাস্তীর্ণকুশানাং কুশপত্রমেকং গৃহীত্বা প্রজা-পতির্ঋষিরগ্নির্দেবতা তৃণনিরসনে বিনিয়োগঃ ওঁ নিরস্তঃ পরাবসুরিত্যনেন নৈর্ঋতাং প্রক্ষিপেৎ। ততঃ অপ উপস্পৃশ্য দক্ষিণ পাদেন বাম পাদমবষ্টভ্য উত্তরাভিমুখীভূয়াস্তৃতকুশানদ্ভিরভ্যুক্ষ্য প্রজাপতির্ঋষিরগ্নির্দেবতা ব্রহ্মোপবেশনে বিনিয়োগঃ ওঁ আবসোঃ

সদনে সীদ ইতি কুশাদিরচিতং ব্রাহ্মণং পূর্ব্বাগ্রং কুশোপরি স্থাপয়েৎ। ব্রাহ্মণব্রহ্ম পক্ষেতু উত্তরামুখঃ সদনে সীদামীতি কর্ত্তা
স্বয়মেব ব্রূয়াৎ। ততস্তদুপরি কুশান্ দত্ত্বাদ্ভিরভ্যুক্ষ্য কুশকুসুমৈরর্চ্চয়েৎ। ততস্তেনৈব পথা পরাবৃত্যাসনে প্রাঙ্মুখ উপবিশতি।
ততো ভূমিজপাদিকং কুর্য্যাৎ। যদি ব্রহ্মত্বারোপিতো ব্রাহ্মণো হ্যযজ্ঞীয় বাগ্বচনং ব্রূয়াৎ তদা ইমং মন্ত্রং জপেৎ। প্রজাপতি-
ঋষির্গায়ত্রীচ্ছন্দো বিষ্ণুর্দেবতা অযজ্ঞীয় বাগ্বচননিমিত্তজপে বিনিয়োগঃ। ওঁ ইদং বিষ্ণুর্বিচক্রমে ত্রেধা নিদধে পদং সমূঢ়মস্য
পাংশুলে ইতি জপেৎ। কুশাদিব্রহ্মপক্ষে তু কর্ম্মকর্ত্তুরেব কৃতাকৃতাবেক্ষণাদি ব্রহ্মকার্য্য কর্ত্তৃত্বাৎ অযজ্ঞীয় বাগ্বচননিমিত্তং কর্ত্তা
স এব জপেৎ। অথ প্রকৃতে কর্ম্মণি যদি চরুহোমো হস্তি তদাস্মিন্নেব সময়ে চরু শ্রপয়েৎ। তত্রাগ্নেরুত্তরতশ্চরুস্থালীমাজ্য-
স্থালীং শ্রুকশ্রুবৌ মেক্ষণং সমিধমাজ্যাদীনি প্রাগুক্তানি প্রাক্সং প্রাক্সং বিনিয়োগক্রমেণাসাদয়তি। ততো হগ্নেঃ পশ্চিমতো
দক্ষিণভাগে প্রাগগ্রান্ কুশানাস্তীর্য্য প্রক্ষালিতবারুণোদূখলং মূষলঞ্চ বৈণবঞ্চ শূর্পং বারুণচমসস্থ জলং প্রোক্ষিতার্থং সংস্থাপ্য ব্রীহীন্
তদভাবে শালীন্ শূর্পে নিধায় ওঁ অগ্নয়ে ত্বা জুষ্টং নির্ব্বপামি ইতি ব্রীহ্যাদিপ্রসৃতিমেকাং চরুস্থাল্যাং কৃত্বা উদূখলমধ্যে
স্থাপয়েৎ। এবং পূষ্ণে ত্বা জুষ্টং নির্ব্বপামি ওঁ ইন্দ্রায় ত্বা জুষ্টং নির্ব্বপামি ওঁ ঈশ্বরায় ত্বা জুষ্টং নির্ব্বপামি ইতি মন্ত্রৈঃ
প্রসৃতিত্রয়ং স্থাপয়েৎ। তূষ্ণীমপরং প্রসৃতিদ্বয়ম্। তত উপরিকৃতদক্ষিণবামপাণিভ্যাং মূষলেনাবহত্য শূর্পেণ প্রস্ফোটয়েৎ।
এবমপরং বারদ্বয়মাবহত্য প্রস্ফোটয়েৎ। তথা কর্ত্তব্যং যথা বারত্রয়েণ তণ্ডুলনিষ্পত্তির্ভবতি। অশক্তৌ তণ্ডুলেষ্বেবং কর্ত্তব্যম্।
ততস্তণ্ডুলান্ ত্রিঃ প্রক্ষাল্য চরুস্থাল্যামমন্ত্রকং কৃতোত্তরাগ্রং পবিত্রং নিঃক্ষিপ্য তত্র তণ্ডুলান্নিধায় দুগ্ধং নিক্ষিপ্য মেক্ষণেন

তমস্য বিংশতিকাষ্ঠিকাং গৃহীত্বা তদুপরি ঘৃতস্রুবন্দত্ত্বা কিঞ্চিদুত্থায় প্রজাপতিং মনসা ধ্যাত্বা তূষ্ণীং জুহুয়াৎ। তত আস্ত-
রণকুশাদেব সাগ্রকুশপত্রদ্বয়ং গৃহীত্বা প্রজাপতির্ঋষিঃ পবিত্রে দেবতে পবিত্রচ্ছেদনে বিনিয়োগঃ। ওঁ পবিত্রে স্থো বৈষ্ণব্যৌ
ইত্যনেন কুশান্তরেণ বেষ্টয়িত্বা নখলোহব্যতিরেকেণ প্রাদেশমাত্রং পবিত্রং ছিত্ত্বা প্রজাপতির্ঋষিঃ পবিত্রে দেবতে পবিত্র-
মার্জ্জনে বিনিয়োগঃ ওঁ বিষ্ণোর্মনসা পূতে স্থ ইত্যনেনাভ্যুক্ষ্য তাম্রাদিপাত্রে উত্তরাগ্রং নিঃক্ষিপ্য তত্র হোমার্থং ঘৃতং নিধায়
তৎকুশপত্রদ্বয়মগ্রে দক্ষিণহস্তানামিকাঙ্গুষ্ঠাভ্যাং মূলে চ বামহস্তানামিকাঙ্গুষ্ঠাভ্যাং গৃহীত্বা দক্ষিণহস্তোপরি ভাবেনাধোমুখো
ব্যস্তপাণিঃ প্রজাপতির্ঋষিরাজ্যং দেবতা আজ্যোৎপবনে বিনিয়োগঃ। ওঁ দেবস্ত্বা সবিতোৎপুনাত্বচ্ছিদ্রেণ পবিত্রেণ বসোঃ
সূর্য্যস্য রশ্মিভিঃ স্বাহা। অনেন কুশপত্রদ্বয়মধ্যেন ঘৃতমগ্নৌ সকৃৎ জুহুয়াৎ। তূষ্ণীং বারদ্বয়ম্। ততস্তৎকুশপত্রদ্বয়মদ্ভিরভ্যু-
ক্ষ্যাগ্নৌ প্রক্ষিপেৎ। ততস্তস্যাজ্যপাত্রস্যোদকেনানুমার্জ্জনং অগ্নেরুপরি নিধানং উত্তরস্যান্দিশ্যবতারণং ইত্থমেব বারত্রয়ং সংকু-
র্য্যাৎ। স্রুকস্রুবাবপি বারিণা প্রক্ষালিতৌ প্রত্যেকং কুশৈঃ প্রাগাবর্ত্তং সংপৃজ্যাগ্নৌ প্রতপ্যোত্তরতো ন্যুব্জৌ নিদধ্যাৎ। এবং
মেক্ষণসংস্কারোঽপি। ততোঽগ্নেঃ পশ্চিমতঃ প্রাগগ্রকুশোপরি পূর্ব্বমাজ্যং ততঃ পশ্চিমে চরুং স্থাপয়েৎ। ততো দক্ষিণং
জানু ভূমৌ পাতয়িত্বা উদকাঞ্জলিং গৃহীত্বা প্রজাপতির্ঋষিরদিতির্দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ অদিতে ঽনুমন্যস্ব
ইত্যনেনাগ্নের্দক্ষিণতঃ পশ্চিমান্তাৎ পূর্ব্বান্তং যাবৎ পূর্ব্বাগ্রাং বারিধারাং দদ্যাৎ। ততঃ প্রজাপতির্ঋষিরনুমতির্দেবতা উদকাঞ্জলি-
সেকে বিনিয়োগঃ। ওঁ অনুমতে ঽনুমন্যস্ব ইত্যনেনাগ্নেঃ পশ্চিমতো দক্ষিণান্তাৎ উত্তরান্তং যাবৎ উত্তরাগ্রাং বারিধারাং দদ্যাৎ।

ততঃ প্রজাপতির্ঋষিঃ সরস্বতী দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ সরস্বত্যনুমন্যস্ব ইত্যনেনাগ্নেরুত্তরতঃ পশ্চিমান্তাৎ
পূর্ব্বান্তং যাবৎ পূর্ব্বাগ্রাং বারিধারাং দদ্যাৎ। প্রজাপতির্ঋষিঃ সবিতা দেবতা অগ্নিপর্য্যুক্ষণে বিনিয়োগঃ। ওঁ দেব সবিতঃ
প্রসুব যজ্ঞং প্রসুব যজ্ঞপতিং ভগায় দিব্যো গন্ধর্ব্বঃ কেতপূঃ কেতন্নঃ পুনাতু বাচস্পতির্বাচন্নঃ সদত্ব ইত্যনেনোদকাঞ্জলিনা
দক্ষিণাবর্ত্তেনাগ্নিং বেষ্টয়েৎ। ততো দক্ষিণং জানূত্তোল্য বৃষোৎসর্গস্য কাম্যত্বাৎ প্রথমং উপর্য্যধঃ স্থিত দক্ষিণবামমুষ্টিভ্যাং
ফলপুষ্পকুশান্ গৃহীত্বা বিরূপাক্ষজপং কুর্য্যাৎ। পরমেষ্ঠিঋষীরুদ্ররূপো ঽগ্নির্দেবতা বিরূপাক্ষজপে বিনিয়োগঃ। ওঁ তপশ্চ
তেজশ্চ শ্রদ্ধা চ হ্রীশ্চ সত্যঞ্চাক্রোধশ্চ ত্যাগশ্চ ধৃতিশ্চ ধর্ম্মশ্চ সত্ত্বঞ্চ বাক্ চ মনশ্চাত্মা চ ব্রহ্ম চ তানি প্রপদ্যে তানি মাম-
বন্তু ইতি জপ্ত্বা ওঁ ভূর্ভুবঃ স্বরোঁম্ মহান্তমাত্মানং প্রপদ্যে বিরূপাক্ষোঽসি দন্তাঞ্জিস্তস্য তে শয্যাপর্ণে গৃহান্তরীক্ষে বিমিতং
হিরণ্ময়ং তদ্দেবানাং হৃদয়ান্যয়স্ময়ে কুম্ভেঽন্তঃ সন্নিহিতানি তানি বলভৃচ্চ বলসাচ্চ রক্ষতো ঽপ্রমণী অনিমিষতৎসত্যং যত্তে
দ্বাদশপুত্রাস্তে ত্বা সম্বৎসরে সম্বৎসরেণ কামপ্রেণ যজ্ঞেন যাজয়িত্বা পুনর্ব্রহ্মচর্য্যমুপয়ন্তি ত্বং দেবেষু ব্রাহ্মণো ঽস্যহং মনুষ্যেষু
ব্রাহ্মণো বৈ ব্রাহ্মণমুপধাবত্যুপধাবামি জপন্তং মা মা প্রতিজাপীর্জুহ্বন্তং মা মা প্রতিহৌষীঃ কুর্ব্বন্তং মা মা প্রতিকার্ষীস্ত্বাং প্রপদ্যে
ত্বয়া প্রসূত ইদং কর্ম্ম করিষ্যামি তন্মে রাধ্যতাং তন্মে সমৃধ্যতাং তন্ম উপপদ্যতাং সমুদ্রো মা বিশ্বব্যচা ব্রহ্মানুজানাতু তুথো
মা বিশ্ববেদা ব্রহ্মণঃ পুত্রোঽনুজানাতু শ্বাত্রো মা প্রচেতা মৈত্রাবরুণোঽনুজানাতু তস্মৈ বিরূপাক্ষায় দন্তাঞ্জয়ে সমুদ্রায় বিশ্ব-
ব্যচসে তুথায় বিশ্ববেদসে শ্বাত্রায় প্রচেতসে সহস্রাক্ষায় ব্রহ্মণঃ পুত্রায় নমঃ ইতি জপ্ত্বা গৃহীতকুশান্ প্রাগুদীচ্যাং দিশি ৩৮০

ক্ষিপেৎ। ফলপুষ্পে ব্রহ্মণে নিবেদয়েৎ। ইতি বীরেশ্বরঃ॥ * ॥ অত্রেদমিত্যনুহেন প্রযোজ্যমিতি সর্ব্বকর্ম্মসাধারণী কুশণ্ডিকা। ততঃ প্রকৃতং কর্ম্ম কুর্য্যাৎ॥ * ॥ * ॥ * ॥ * ॥ * ॥

ওঁ অগ্নে ত্বং সাহসনামাসীতি নাম কৃত্বা ধ্যায়েৎ। পিঙ্গভ্রূশ্মশ্রুকেশাক্ষঃ পীনাঙ্গো জঠরোঽরুণঃ। ছাগস্থঃ সাক্ষসূত্রোঽগ্নিঃ সপ্তার্চ্চিঃ শক্তিধারকঃ। ইত্যাদিত্যপুরাণীয়ং ধ্যাত্বা ওঁ ভূর্ভুবঃ স্বঃ সাহসাগ্নে ইহাগচ্ছ ইহাগচ্ছ ইত্যাবাহ্য এষ গন্ধঃ ওঁ সাহসাগ্নয়ে নমঃ। ইত্যাদিনা পঞ্চোপচারৈঃ পূজয়েৎ। ততো দক্ষিণং জানু পাতয়িত্বা প্রাদেশমিতাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা জুহ্বাং ঘৃতস্রুবচতুষ্টয়ং দত্ত্বা ভৃগুগোত্রস্য ভার্গবপ্রবরস্য বা ঘৃতস্রুবপঞ্চকং দত্ত্বা অগ্নেরুত্তরভাগে ওঁ অগ্নয়ে স্বাহেতি প্রাঙ্মুখীং ঘৃতধারাং কৃত্বা জুহ্বাং জুহুয়াৎ। তথাগ্নের্দ্দক্ষিণভাগে ওঁ সোমায় স্বাহা। ইতি প্রাঙ্মুখীং ঘৃতধারাং দত্ত্বা জুহুয়াৎ। ততশ্চরুহোমঃ॥ * ॥ ৩৮১

ততো জুহ্বাং ঘৃতস্রুবং দত্ত্বা চরুমধ্যে চ ঘৃতস্রুবং দত্ত্বা চরুমধ্যান্মেক্ষণেনাঙ্গুষ্ঠপর্ব্বমাত্রমবদানং কৃত্বা জুহ্বাং স্থাপয়েৎ। অবদানস্থানে চরৌ ঘৃতস্রুবং দদ্যাৎ। ততশ্চরোঃ পূর্ব্বভাগে ঘৃতস্রুবং দত্ত্বা তত এব মেক্ষণেনাবদানং কৃত্বা জুহ্বাং স্থাপয়েৎ। অবদানস্থানে চরৌ ঘৃতস্রুবং দদ্যাৎ। ততো জুহ্বাং ঘৃতস্রুবং দত্ত্বা ওঁ অগ্নয়ে স্বাহা ইত্যনেনাগ্নের্মধ্যে জুহ্বৈব জুহুয়াৎ। এবমেব ওঁ পুঙ্খে স্বাহা। ওঁ ইন্দ্রায় স্বাহা। ওঁ ঈশ্বরায় স্বাহা। ইত্যাহুতিত্রয়ং দদ্যাৎ। ভৃগুগোত্রস্তু পঞ্চাবদানাৎ তথা পশ্চিমভাগাদপি তৃতীয়াবদানং কৃত্বা জুহুয়াদিতি বিশেষঃ। ততো জুহ্বাং ঘৃতস্রুবচতুষ্টয়ং ভৃগুগোত্রস্তু ঘৃতস্রুবপঞ্চকং কৃত্বা ওঁ সোমং রাজানং বরুণামগ্নিমন্বারভামহে। আদিত্যং বিষ্ণুং সূর্য্যং ব্রহ্মাণঞ্চ বৃহস্পতিং স্বাহা। ইতি জুহ্বাং জুহুয়াৎ। পুনরপি

জুহ্বাং ঘৃতশ্রুবচতুষ্টয়ং তৎপঞ্চকং বা কৃত্বা ওঁ শুক্রন্তেঽন্যদ্যজন্তেঽন্যদ্বিষুরূপে অহনীদ্যোরিবাসি বিশ্বা হি মায়া অবসি স্বধাবন্ ভদ্রা তে পূষন্নিহ রাতিরস্তু স্বাহা। ইতি জুহ্বাং জুহুয়াৎ। পুনরপি জুহ্বাং ঘৃতশ্রুবচতুষ্টয়ং তৎপঞ্চকং বা কৃত্বা ওঁ ইন্দ্রা পর্ব্বতা বৃহতা রথেন বামী বর্ষ আবহতং সুবীরাঃ। বীতং হব্যান্যধ্বরেষু দেবা বর্দ্ধেথাং গীর্ভিরীড়য়া মদন্তাং স্বাহা। ইতি জুহ্বাং জুহুয়াৎ। পুনরপি জুহ্বাং ঘৃতশ্রুবচতুষ্টয়ং তৎপঞ্চকং বা গৃহীত্বা ওঁ আবো রাজানমধ্বরস্য রুদ্রং হোতারং সত্যযজং রোদস্যোঃ। অগ্নিং পুরাতনয়িত্নোরচিত্তাদ্ধিরণ্যরূপমবসে কৃণুধ্বং স্বাহা ইতি জুহ্বাং জুহুয়াৎ। ততো জুহ্বাং তথৈব ঘৃতশ্রুবং দত্ত্বা চরোরীশানকোণাৎ প্রচুরতরং হবিরাদায় জুহ্বায়াং কৃত্বা তদুপরি ঘৃতশ্রুবদ্বয়ং দত্ত্বা ওঁ অগ্নয়ে স্বিষ্টিকৃতে স্বাহা। ইত্যগ্নেরীশানকোণে জুহুয়াৎ। পঞ্চাবদানপক্ষে ঘৃতশ্রুবদ্বয়েনোপস্তরণং সকৃদ্ধবির্নিক্ষেপঃ। পুনর্ঘৃতেনাভিষেচনদ্বয়মিতি। ততঃ 
প্রাদেশমিতাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা শ্রুবেণ প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দো ঽগ্নির্দেবতা মহাব্যাহৃতি হোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতির্ঋষিরুষ্ণিক্ ছন্দো বায়ুর্দেবতা মহাব্যাহৃতি হোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতির্ঋষিরনুষ্টুপ্ ছন্দঃ সূর্য্যোদেবতা মহাব্যাহৃতি হোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। ততঃ প্রাদেশপ্রমাণাং ঘৃতাক্তাং সমিধং তূষ্ণীমগ্নৌ হুত্বা প্রকৃতং হোমং সমাপ্য মেক্ষণমগ্নৌ প্রক্ষিপেৎ। ভবদেবভট্টবীরেশ্বরমতে মহাব্যাহৃতি হোমাৎ প্রাক্ মেক্ষণ প্রক্ষেপঃ। ততো বৎসতরীচতুষ্টয়সহিতং বৃষং প্রাঙ্মুখমগ্নিসমীপং নীত্বা ওঁ মানস্তোকে তনয়ে মান আয়ুষি মানো গোষু মানোঽশ্বেষু রীরিষঃ বীরান্মানো রুদ্রভাগিনো বধীর্হবিষ্মন্তঃ সদসি ত্বা হবামহে। ইতি মন্ত্রেণ বৃষস্য দক্ষিণস্ফিচি দণ্ডোৎপল-

দণ্ডেন কুঙ্কুমেন অলাভে হরিদ্রয়া ত্রিশূলং লিখেৎ। বীরান্মান ইতি সামগানাম্। অন্যেষান্তু মনো বীরানিতি। ওঁ বৃষাহসি
ভানুনা দ্যুমন্তং ত্বা হবামহে পবমানঃ স্বর্দৃশম্। ইত্যনেন বামস্ফিচি তেনৈব চক্রং লিখেৎ। ততঃ সুধ্মাপিতেন লৌহেন
গোপালকেন তাবঙ্কৌ প্রস্ফোটয়েৎ। ততঃ ওঁ একো বৃষাবিরাজতীত্যনুগীয়মানেন সাম্না বৃষং কলসস্থাভিঃ সর্ব্বৌষধিসুগন্ধী
কৃতাভিরদ্ভিঃ স্নাপয়েৎ। গানাশক্তৌ ঋচং ত্রিধা পঠেৎ। ঋক্ চ ওঁ য এক ইদ্বিদয়তে বসুমর্ত্তায় দাশুষে ঈশানোঽপ্রতি-
স্কুত ইন্দ্রো অঙ্গ। ততঃ সর্ব্বৌষধিজলেন তথৈব তুষ্ণীং বৎসতরীচতুষ্টয়ং স্নাপয়েৎ। ততো বৃষং শুক্লবাসো যুগেনাচ্ছাদ্য সৌবর্ণ-
বীরপট্টকং ওঁ সত্য মিথ্যা বৃষো দসি ইত্যাদি বৃষাদেব দ্যুমানিত্যাদি ঋগ্দ্বয়েন গীয়মানেন বৃষস্য ললাটে বধ্নীয়াৎ। তয়ো-
র্গানাশক্তৌ ঋক্দ্বয়ং ত্রিধা পঠেৎ। ঋগ্দ্বয়স্তু ওঁ সত্য মিথ্যা বৃষো জূতির্নোঽবিতা বৃষাঽগ্রেঽশ্বন্নিষে পরাবতি বৃষোর্ব্বারতি- ৩৮১
শ্রুতঃ। ওঁ বৃষা সোমনুমাং অসি বৃষদেব বৃষব্রতঃ বৃষা ধর্ম্মাণি দধ্রিষে। ততো বৃষমগ্নিং প্রদক্ষিণমেকবারং কারয়েৎ। তং
প্রদক্ষিণং কার্য্যমাণং লোহিতবৎসিকামনুগময়েৎ। তাঞ্চানুগচ্ছন্তীং ওঁ কাম্যাসি প্রিয়াসি হব্যাসি ইতাসি রন্তাসি সরস্বত্যাসি
মহসি বিশ্রুতিরসি ইতি গোনামভিরষ্টভিঃ সম্বোধয়েৎ। ততোঽগ্নেরুত্তরতো দৃঢ়নিখাতযূপে পূর্ব্বাভিমুখং বৃষং গলে বাসসা
বদ্ধা বৃষস্য পূর্ব্বাদিক্রমেণোপযূপচতুষ্টয়েষু বৎসতরীচতুষ্টয়ং বাসোভির্গলে বধ্নীয়াৎ। ততঃ সৌবর্ণশৃঙ্গ ২ রজতক্ষুর ৪ তাম্রপৃষ্ঠ ১
কাংস্যক্রোড় ১ দর্পণ ১ লৌহঘণ্টা ১ চামর ১ লৌহনূপুরৈর্ব্বৃষমলংকৃত্য অশক্তৌ কাংস্যক্রোড়ৈরলংকৃত্য যজমানঃ এষ গন্ধঃ
সোপকরণ বৎসতরীচতুষ্টয় সহিত বৃষায় নমঃ। ইত্যনেন গন্ধাদিভিঃ সংপূজ্য বৃষস্য দক্ষিণকর্ণে ওঁ বৃষোঽসি ভগবান ধর্ম্মশ্চতু-

ষ্পাদঃ প্রকীর্ত্তিতঃ। প্রণোমি তমহং ভক্ত্যা স মাং রক্ষতু সর্ব্বদা। ইতি বিষ্ণূক্তং মন্ত্রং জপেৎ। ততঃ কুশজলতিলান্যাদায় ওঁ তৎসদিত্যুচ্চার্য্য হে বৎসতর্য্যো বো যুষ্মাকং এনং যুবানং পতিং স্বামিনং দদামি ত্যজামি ত্যক্তুং প্রার্থয়ামি তেন প্রেণে সহ ক্রীড়ন্তীঃ খেলন্ত্যঃ সুভগা লোকস্য প্রিয়াশ্চরথ তৃণানি ভক্ষয়থ ভ্রমথ। হে বৎসতর্য্যঃ যূয়মপি মা নঃ নাস্মৎ সত্ত্ব বিষয়া ভবিষ্যথ কিন্তু ময়া ত্যক্তব্যা বয়ং প্রযস্য ভবতীনাঞ্চ ত্যাগেন রায়স্পোষেণ ধনসমৃদ্ধ্যা সাপ্তজনুষা সপ্তজন্মব্যাপকেন ইষা অন্নেন চ সম্মদেব কৃতা ভবেম সুভগা লোকস্য প্রিয়া ইতি মন্ত্রার্থং জ্ঞাত্বা এনং যুবানমিত্যস্য যাজ্ঞবল্ক্যঋষিস্ত্রিষ্টুপ্ছন্দো গাবো দেবতা বৃষোৎসর্গে বিনিয়োগঃ ইতি পিতৃভক্তিতরঙ্গিণ্যুক্তং স্মৃত্বা ওঁ এনং যুবানং বো দদামি তেন ক্রীড়ন্তীশ্চরথ প্রিয়েণ মা নঃ সাপ্তজনুষা সুভগা রায়স্পোষেণ সমিষা মদেম ইতি পঠিত্বা ওঁ অদ্যামুকে মাস্যমুক পক্ষে ঽমুকতিথৌ অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ প্রেতলোকবিমুক্তিপূর্ব্বক স্বর্গলোক গমনকামঃ এনং রুদ্রদৈবতং গোপকরণ বৎসতরীচতুষ্টয়সহিত বৃষমহমুৎসৃজে ইত্যুৎসৃজেৎ। ততঃ স্নাতাং শৌষ্টিং পাদ্যং বার্হাহররাদ্যং সোমপৌষং সামানি গবাং ব্রতে সাম্নী আবো রাজা ১ তদ্বোগায় ২ আজ্যদোহানি ৩ দেবব্রতানি ৪ ইতি রৌদ্রীং সংহিতাং ওঁ কয়া নশ্চিত্র ইতি বামদেব্যঞ্চ সাম বৃষং শ্রাবয়েৎ। তত্র গানা-শক্তৌ বারত্রয়মৃচং পঠেৎ। ওঁ উপত্বা যামরো গিরো দেদিশতীর্হবিষ্কতঃ। বায়োরণীকেঽস্থিরম্। ইতি স্নাতা ঋক্। শৌষ্টী-গানাশক্তৌ ওঁ পরা পরবৈস্বনান্ বসূনি মাংশ্চ ত্ব ইন্দো সরসি প্রধন্বন্ ব্রধ্নশ্চিদযস্য বাতো ন সজুতিং পুরুমেধাশ্চিত্তকরেণ বন্ধাৎ। ইতি শৌষ্টি ঋক্। পাদ্যগানাশক্তৌ ওঁ প্রসম্রাজঞ্চর্ষণীনামিন্দ্রং স্তোতা নব্যং গীর্ভিঃ। নরং নৃষাহং মংহিষ্ঠম্। ইতি

পাদ্যং গাম। বার্হাহরাদ্যগানাশক্তৌ। ওঁ অচিক্রদদবৃষাহবির্মহান্ মিত্রা দর্শতঃ। সং সূর্য্যেণ দিদ্যুতে॥ ইতিবর্হাহরাদ্যং
গাম। সোমঃ পৌষগানাশক্তৌ। ওঁ সোমঃ পূষা চ চেততু বিশ্বাসাং সুক্ষিতীনাম্। দেবত্রা রথ্যোর্হিতাঃ। ইতি সোমঃপৌষং
সাম। গবাং ব্রতগানদ্বয়াশক্তৌ। ওঁ তে মন্বত প্রথমং নাম গোনাং ত্রিঃ সপ্ত পরমং নাম জানন্। তা জানতীরভ্যনূষত ক্ষা
আবির্ভুবন্নরুণীর্যশসা গ্নাবঃ। ওঁ অগ্নিমীলে পুরোহিতং যজ্ঞস্য দেবমৃত্বিজম্। হোতারং রত্নধাতমম্। ইতি গবাং ব্রতে দ্বে সাম্নী।
রুদ্রাধ্যায়গানাশক্তৌ ঋক্‌চতুষ্টয়ং ত্রিধা পঠেৎ। ওঁ আবো রাজানমধ্বরস্য রুদ্রং হোতারং সত্যযজং রোদস্যোঃ। অগ্নিং পুরা
তনয়িত্নো রচিত্তাদ্বিরণ্যরূপমবসে কৃণুধ্বম্॥ ১॥ ওঁ তদ্বো গায় সুতে সচা পুরুহূতায় স্বৎসনে। শং যদ্গবে ন শাকিনে॥ ২॥
ওঁ মূর্দ্ধানং দিবোঽরতিং পৃথিব্যা বৈশ্বানরামৃত আজাতমগ্নিং কবিং সম্রাজমতিথিঞ্জনানামাসন্না পাত্রং জনয়ন্ত দেবাঃ॥ ৩॥ ৩৮৩
ওঁ অধিপতে মিত্রপতে ক্ষত্রপতে স্বঃপতে ধনপতে নমঃ॥ * ॥ ইতি রুদ্রাধ্যায় ঋক্‌চতুষ্টয়ম্॥ * ॥ বামদেব্যগানাশক্তৌ
ওঁ কয়া নশ্চিত্র আভুবদূতী সদা বৃধঃ সখা কয়া সচিষ্ঠয়া বৃতা। ওঁ কস্ত্বাসত্যো মদানাং মংহিষ্ঠো মৎসদন্ধসঃ দৃঢ়া চিদা রুজে বসু।
ওঁ অভীষুণঃ সখীনামবীতা জরিতৄণাং শতম্ভবা সূ্যতয়ে। ওঁ স্বস্তি ন ইন্দ্রো বৃদ্ধশ্রবাঃ স্বস্তি নঃ পূষা বিশ্ববেদাঃ স্বস্তি নস্তার্ক্ষো-
ঽরিষ্টনেমিঃ স্বস্তি নো বৃহস্পতির্দধাতু॥ * ॥ ইতি ঋক্‌চতুষ্টয়ম্॥ * ॥ ততঃ ওঁ যথেষ্টং যূপং পর্য্যট ইতি মন্ত্রেণ
বৎসতরীচতুষ্টয়সহিত বৃষং যূপাদ্বিমুচ্য ঐশান্যান্দিশি কিঞ্চিচ্চালয়েৎ। ততঃ ওঁ নখাদেঃ পরশস্যানি নাক্রামে গর্ভিণীঞ্চ গাং।
ইতি বদেৎ। ততো বৃষং প্রদক্ষিণীকৃত্য কৃতাঞ্জলিঃ ওঁ ধর্ম্মোঽসি ত্বং চতুষ্পাদশ্চতস্রস্তে প্রিয়াস্ত্বিমাঃ। চতুর্ণাং পোষণার্থায়

ময়োৎসৃষ্টাস্ত্বয়া সহ। দেবানাঞ্চ পিতৃণাঞ্চ মনুষ্যাণাঞ্চ যোষিতঃ। ভূতানাং তৃপ্তিজননাস্ত্বয়া সার্দ্ধং ব্রজন্তি মাঃ। নমো ব্রহ্মণ্য-দেবেশ পিতৃভূতর্ষিপোষক। ত্বয়ি মুক্তেঽক্ষয়া লোকা মম সন্তু নিরাময়াঃ। মা মে ঋণোঽস্তু দৈবোঽথ পৈত্রো ভৌতো ঽথ মানুষঃ। ধর্ম্মস্ত্বং তৎপ্রপন্নস্য যা গতিঃ সাস্তু মে ধ্রুবা। যৎ কিঞ্চিদ্দুষ্কৃতং কর্ম্ম লোভমোহাৎ কৃতং ভবেৎ। তস্মাদুদ্ধৃত্য দেবেশ পিতুঃ স্বর্গং প্রযচ্ছ মে। যাবন্তি তব লোমানি শরীরে সম্ভবন্তি চ। তাবদ্বর্ষসহস্রাণি স্বর্গে বাসো ঽস্তু মে পিতুঃ। ইতি স্বল্পমৎস্যপুরাণোক্তং পঠেৎ। পুণ্যক্ষয়াদিহাগত্য পিতা মে সর্ব্বধর্ম্মবিৎ। দশজন্মনি বিপ্রত্বং প্রাপ্য শ্রৌতক্রিয়ারতঃ। ততঃ প্রক্ষীণকর্ম্মাসৌ মোক্ষমাপ্নোত্যসংশয়ঃ। ইত্যাধিকং ভবিষ্যে। তত আচারাৎ প্রাচীনাবীতী দক্ষিণামুখো দ্বিগুণ ভুগ্ন কুশত্রয়তিলজল সহিতং বৃষপুচ্ছগলিতোদকমাদায় দক্ষিণাগ্রকুশত্রয়োপরি ওঁ অমুক গোত্রং প্রেতং অমুক দেবশর্ম্মাণং সতিলবৃষপুচ্ছগলিতোদকেন তর্পয়ামীতি ত্রিস্তর্পয়েৎ। ততো বৃষোৎসর্গাঙ্গত্বাৎ প্রাপ্তপিতৃত্বস্য অমুক গোত্রঃ পিতা অমুকদেবশর্ম্মা তৃপ্যতামেৎ সতিল বৃষপুচ্ছ-গলিতোদকং তস্মৈ স্বধা। ইতি বিশেষঃ। এবমন্যেষাং বৃষোৎসর্গেঽপ্যূহমিতি। ততো বৃষোৎসর্গাঙ্গত্বাৎ ব্রহ্মভবিষ্যপুরাণো-ক্তঞ্চ তর্পণম্। বৃষপুচ্ছসম্বন্ধি তিলযবযুত জলাঞ্জলিত্রয়েণ পিত্র্যবিধিনা অনেন মন্ত্রেণ কুর্য্যাৎ। যথা ওঁ স্বধা পিতৃভ্যো মাতৃভ্যো বন্ধুভ্যশ্চাপি তৃপ্তয়ে। মাতৃপক্ষাশ্চ যে কেচিৎ যে চান্যে পিতৃপক্ষজাঃ। গুরুশ্বশুরবন্ধূনাং যে কুলেষু সমুদ্ভবাঃ। যে প্রেতভাব-মাপন্না যে চান্যে শ্রাদ্ধবর্জ্জিতাঃ। বৃষোৎসর্গেন তে সর্ব্বে লভন্তাং প্রীতিমুত্তমাম্ ইতি। তত উদীচ্যং কর্ম্ম কুর্য্যাৎ। তদ্যথা প্রাদেশ প্রমাণাং ঘৃতাক্তাং সমিধং তুষ্ণীমগ্নৌ হুত্বা প্রজাপতির্ঋষির্গায়ত্রীচ্ছন্দোঽগ্নির্দেবতা মহাব্যাহৃতি হোমে বিনিয়োগঃ।

ওঁ ভূঃ স্বাহা। প্রজাপতির্ঋষিরুষ্ণিক্‌ছন্দো বায়ুর্দেবতা মহাব্যাহৃতি হোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতির্ঋষিরনুষ্টুপ্‌-ছন্দঃ সবিতা দেবতা মহাব্যাহৃতি হোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। ততো ঘৃতাক্তাং প্রাদেশপ্রমাণাং সমিধং তূষ্ণীমগ্নৌ হুত্বা ছন্দোগপরিশিষ্টোক্তং প্রায়শ্চিত্তহোমং কুর্য্যাৎ। ন তু শাট্যায়নহোমং তস্য ভট্টনারায়ণ প্রভৃতিভিরপ্রমাণী কৃতত্বাৎ। অত্র ওঁ অদ্যেত্যাদি কৃতৈতদ্‌বৃষোৎসর্গহোমকর্ম্মণি যৎকিঞ্চিদ্বৈগুণ্যং জাতং তদ্দোষ প্রশমনায় ব্যস্তসমস্ত মহাব্যাহৃতিভিঃ প্রায়শ্চিত্ত হোমমহং করিষ্যামি। স্বার্থক্কেৎ করিষ্যে ইতি সঙ্কল্প্য প্রায়শ্চিত্তহোমে ওঁ অগ্নে ত্বং বিধুনামাসীতি নাম কৃত্বাবাহ্য পূজয়িত্বা পূর্ব্ববদেব সমিৎপ্রক্ষেপং মহাব্যাহৃতি হোমঞ্চ কুর্য্যাৎ। ততঃ প্রায়শ্চিত্তার্থং ব্যস্তসমস্ত মহাব্যাহৃতিভির্জুহুয়াৎ। যথা প্রজাপতির্ঋষির্গায়ত্রীছন্দোঽগ্নির্দেবতা মহাব্যাহৃতিভিঃ প্রায়শ্চিত্তহোমে বিনিয়োগঃ। ওঁ ভূঃ স্বাহা। প্রজাপতির্ঋষিরু-ষ্ণিক্‌ছন্দো বায়ুর্দেবতা মহাব্যাহৃতিভিঃ প্রায়শ্চিত্ত হোমে বিনিয়োগঃ। ওঁ ভুবঃ স্বাহা। প্রজাপতির্ঋষিঃ সূর্য্যো দেবতা মহা-ব্যাহৃতিভিঃ প্রায়শ্চিত্ত হোমে বিনিয়োগঃ। ওঁ স্বঃ স্বাহা। প্রজাপতির্ঋষিরনুষ্টুপ্‌ছন্দঃ সবিতা দেবতা মহাব্যাহৃতিভিঃ প্রায়শ্চিত্ত হোমে বিনিয়োগঃ। ওঁ ভূর্ভুবঃ স্বঃ স্বাহা। ততঃ পূর্ব্বদেব সমিৎ প্রক্ষেপপূর্ব্বকং তিসৃভির্মহাব্যাহৃতিভির্হোমঃ সমিৎপ্রক্ষে-পশ্চ। প্রায়শ্চিত্ত হোমে বিনিয়োগঃ ইতি পাঠং বিনা নববার মহাব্যাহৃতি হোমকরণে প্রায়শ্চিত্ত হোমসিদ্ধিরিত্যপি কেচিৎ। ততঃ প্রজাপতির্ঋষিঃ সবিতা দেবতা অগ্নিপর্য্যুক্ষণে বিনিয়োগঃ। ওঁ দেব সবিতঃ প্রসুব যজ্ঞং প্রসুব যজ্ঞপতিং ভগায় দিব্যো গন্ধর্ব্বঃ কেতপূঃ কেতন্নঃ পুনাতু বাচস্পতির্বাচং নঃ স্বদতু। অনেনোদকাঞ্জলিনা দক্ষিণাবর্ত্তেনাগ্নিং বেষ্টয়েৎ। ততঃ

প্রজাপতির্ঋষিরদিতির্দ্দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ অদিতে ঽন্বমংস্থাঃ অর্দ্দেননাগ্নের্দ্দক্ষিণতঃ পশ্চিমান্তাৎ পূর্ব্বান্তং যাব-
দুদকাঞ্জলিনা সিঞ্চেৎ। ততঃ প্রজাপতির্ঋষিরনুমতির্দ্দেবতা উদকাঞ্জলিসেকে বিনিয়োগঃ। ওঁ অনুমতে ঽন্বমংস্থাঃ অনে-
নাগ্নেঃ পশ্চিমতো দক্ষিণান্তাদুত্তরান্তং যাবদুদকাঞ্জলিনা সিঞ্চেৎ। ততঃ প্রজাপতির্ঋষিঃ সরস্বতী দেবতা উদকাঞ্জলিসেকে
বিনিয়োগঃ। ওঁ সরস্বত্যন্বমংস্থাঃ। অনেনাগ্নেরুত্তরতঃ পশ্চিমান্তাৎ পূর্ব্বান্তং যাবদুদকাঞ্জলিনা সিঞ্চেৎ। তত উত্তানহস্ত-
দ্বয়েন কতিপযাস্তরণকুশান্ গৃহীত্বা প্রজাপতির্ঋষির্ব্বয়ো দেবতা দর্ভতৃণাভ্যঞ্জনে বিনিয়োগঃ। ওঁ অক্তং রিহাণা ব্যন্তু
বয়ঃ। অনেনাগ্রমধ্যমূলেষু বারত্রয়মভ্যঞ্জনং মন্ত্রশ্চ বারত্রয়মেব পঠিতব্যঃ। ততস্তান্ দর্ভানদ্ভিরভ্যুক্ষ্য প্রজাপতির্ঋষি-
রনুষ্টুপ্ছন্দো ঽগ্নির্দ্দেবতা দর্ভজুটিকা হোমে বিনিয়োগঃ। ওঁ যঃ পশূনামধিপতী রুদ্রস্তন্তিচরো বৃষা পশূনস্মাকং মা হিংসী-
রেতদস্তু হুতং তব স্বাহা ইত্যনেনাগ্নৌ প্রক্ষিপেৎ। ততঃ পূর্ণাহুত্যাং ওঁ অগ্নে ত্বং মৃড়নামাসীতি নাম কৃত্বাবাহ্য সংপূজ্য উত্থায়
প্রজাপতির্ঋষির্ব্বিরাট্ছন্দ ইন্দ্রো দেবতা যশস্কামস্য যজনীয় প্রয়োগে বিনিয়োগঃ। ওঁ পূর্ণহোমং যশসে জুহোতি বরমস্মৈ
দদাতি বরং বৃণে যশসা ভামি লোকে স্বাহা। অনেন পূর্ণাহুতিংদদ্যাৎ। তত ঐশান্যাং দিশি আচারাৎ পৃথিব্যং শীতলা
ভব ইতি দুগ্ধাদি ক্ষিপ্তা। শ্রুবলগ্ন ভস্মনা ওঁ কশ্যপস্য ত্র্যায়ুষমিতি শিরসি। ওঁ যমদগ্নেস্ত্র্যায়ুষং ইতি কণ্ঠে। ওঁ যদ্দেবানাং
ত্র্যায়ুষতমিতি বাহুমূলয়োঃ। তন্মে ঽস্তু ত্র্যায়ুষমিতি হৃদি। অন্যকর্ত্তৃক পাঠে তু তত্তে ইতি বিশেষঃ। ততো বামদেব্যগানং
তদশক্তৌ কুশকুসুমসহিত বারিপূর্ণ পাত্রে হস্তং নিধায় শান্তিং কুর্য্যাৎ। যথা মহাবামদেব্যঋষির্গায়ত্রীচ্ছন্দ ইন্দ্রো দেবতা শান্তি

কর্ম্মনি জপে বিনিয়োগঃ। ওঁ কয়া নশ্চিত্র আভুবদূতী সদা বৃধঃ সখা কয়া সচিষ্ঠয়া বৃতা। ওঁ কস্ত্বাসত্যো মদানাং মংহিষ্ঠো মৎসদন্ধসঃ দৃঢ়া চিদা রুজে বসু। ওঁ অভিষূণঃ সখিনামবিতা জরিতৃণাং শতম্ভবা স্যূতয়ে। ইতি ত্রিঃ পঠিত্বা ওঁ স্বস্তি ন ইন্দ্রো বৃদ্ধশ্রবাঃ স্বস্তি নঃ পূষা বিশ্ববেদাঃ স্বস্তি ন স্তার্ক্ষো হরিষ্টনেমিঃ স্বস্তি নো বৃহস্পতির্দধাতু। ইতি পঠেৎ। ততো দক্ষিণা-ত্রয়ম্ তত্রাদৌ অদ্যেত্যাদি কৃতৈতদ্বৃষোৎসর্গাঙ্গভূতহোমকর্ম্মণি ব্রহ্মকর্ম্মপ্রতিষ্ঠার্থং দক্ষিণামিদং পূর্ণপাত্রং কাঞ্চনাদিকং বা বিষ্ণুদৈবতং অমুক গোত্রায়ামুক দেবশর্ম্মণে ব্রহ্মণে তুভ্যমহং সম্প্রদদানি। স্বার্থঞ্চেৎ সম্প্রদদে ইতি। ততো ব্রহ্মা স্বস্তীতি ব্রূয়াৎ। ওঁকারমুচ্চরন্ প্রাজ্ঞো দ্রবিণং শক্তুমোদনম্। গৃহীত্বা দক্ষিণে হস্তে তদন্তে স্বস্তি কীর্ত্তয়েৎ ইত্যাদি পুরাণীয়াৎ। ততঃ স্বয়ং হোতৃপক্ষে তু অদ্যেত্যাদি কৃতৈতদ্বৃষোৎসর্গাঙ্গভূত হোমকর্ম্ম প্রতিষ্ঠার্থং দক্ষিণামেতানি বস্ত্রযুগকাংস্যহিরণ্যানি বিষ্ণুদৈব-তানি অমুক গোত্রায়ামুক দেবশর্ম্মণে ব্রহ্মণে তুভ্যমহং সম্প্রদদানি। স্বার্থঞ্চেৎ সম্প্রদদে ইতি। ব্রহ্মা স্বস্তীতি ব্রূয়াৎ। ততঃ ওঁ অদ্যেত্যাদি কৃতৈতদ্বৃষোৎসর্গাঙ্গহোমকর্ম্মণি হোতৃকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামেতানি বস্ত্রযুগকাংস্যহিরণ্যানি বৃহস্পতিচন্দ্রবহ্নি-দৈবতানি বিষ্ণুদৈবতানি বা অমুক গোত্রায়ামুক দেবশর্ম্মণে তুভ্যমহং সম্প্রদদানি। স্বার্থঞ্চেৎ সম্প্রদদে ইতি বিশেষঃ। ওঁ স্বস্তীতি প্রতিবচনম্। অন্যহোতৃপক্ষে ব্রহ্মণে ইত্যত্র হোত্রে ইতি প্রযোজ্যম্। ততো বৎসতরীণামলঙ্কারং বৃষবাসসীচাচার্য্যায় প্রতি পাদয়েৎ। ততঃ ওঁ অদ্যেত্যাদি কৃতৈতদ্বৃষোৎস্বর্গকর্ম্মণঃ প্রতিষ্ঠার্থং দক্ষিণামিমং বৃষং রুদ্রদৈবতং অমুক গোত্রায়ামুক দেবশর্ম্মণে ব্রাহ্মণায়াচার্য্যায় তুভ্যমহং সংপ্রদদানি। স্বার্থঞ্চেৎ সম্প্রদদে ইতি বিশেষঃ। আচার্য্যাগ্রহণে অন্যস্মৈ ব্রাহ্মণায়

দদ্যাৎ গবাভাবে গোমূল্যং বিষ্ণুদৈবতমিতি বিশেষঃ। ততো বৃষাঙ্ককর্ত্রে বেতনং দদ্যাৎ। ততঃ ব্রাহ্মণানাহ অস্মিন্ কর্ম্মণি যৎ কিঞ্চিৎ ময়োসৃষ্টঞ্চ দির্জনে। তৎ কশ্চিদন্যো ন নয়েদ্বিভাজ্যঞ্চ যথাক্রমং। ন বাহ্যং ন চ তৎ ক্ষীরং পাতব্যং কেনচিৎ ক্বচিৎ। ইতি ব্রাহ্মণান্ শ্রাবয়েৎ। ততঃ কৃতৈতদ্বৃষোৎসর্গকর্ম্মাচ্ছিদ্রমস্তু ইত্যচ্ছিদ্রমবধারয়েৎ। ওঁ অদ্যেত্যাদি কৃতৈতৎকর্ম্মণি যৎ কিঞ্চিদ্বৈগুণ্যংজাতং তদ্দোষপ্রশমনায়েত্যাদিনা সার্থং বিষ্ণুং স্মরেৎ। ওঁ তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সূরয়ঃ। দিবীব চক্ষুরাততম্। ইত্যনেন তন্নামানি চ সংকীর্ত্তয়েৎ। ততঃ ওঁ গচ্ছধ্বমমরাঃ সর্ব্বে গৃহীত্বার্চ্চাং স্বমালয়ম্ সন্তুষ্টা বরমস্মাকং দত্ত্বেদানীং সুপূজিতাঃ। ইতি বিষ্ণুধর্ম্মোত্তরীয়ং পঠিত্বা বিসৃজেৎ ততঃ ওঁ প্রীয়তাং পুণ্ডরীকাক্ষঃ সর্ব্বযজ্ঞেশ্বরো হরিঃ। তস্মিংস্তুষ্টে জগত্তুষ্টং প্রীণিতে প্রীণিতং জগৎ। ইতি মৎস্যপুরাণোক্তং পঠেৎ। তত আশীর্ব্বাদঞ্চ গৃহ্নীয়াৎ। ততঃ প্রেতশ্রাদ্ধং কুর্য্যাৎ ততো দশানূ্যনং ব্রাহ্মণেভ্যো ভোজ্যানি দদ্যাৎ ॥ * ॥ * ॥ * ॥

॥ * ॥ ইতি রঘুনন্দনভট্টাচার্য্যকৃতং ছন্দোগানাং বৃষোৎসর্গপ্রয়োগতত্ত্বং সমাপ্তম্ ॥ * ॥

ওঁ গণেশায় নমঃ। অথ চন্দনধেনুদান প্রয়োগঃ॥ * ॥ যথা গোশালায়াং পুণ্যভূমৌ বা বিতানযুক্তায়াং প্রাগুদক্-
প্লবনং দেশং গোময়েনোপলিপ্য বেদ্যাং স্বস্তিকং নির্ম্মায় যজমানঃ কৃতনিত্যকৃত্য আচান্তঃ কুশহস্তো দ্বিবাসাঃ প্রাঙ্মুখঃ ওঁ
তদ্বিষ্ণোরিতি বিষ্ণুং স্মৃত্বা নত্বা চ উদঙ্মুখঃ ওঁ তৎসদিত্যুচ্চার্য্য তাম্রপাত্রে কুশতিলজলান্যাদায় বিশেষানুদ্দেশানুখ্যচান্দ্রমাসো-
ল্লেখেন ওঁ অদ্যেত্যাদি অমুকে মাসি অমুক পক্ষে অমুক তিথৌ অমুক গোত্রায়াঃ প্রেতায়াঃ অমুক্যা অশৌচান্তাদ্দ্বিতীয়েঽহ্নি
অমুক গোত্রায়াঃ প্রেতায়া অমুক্যাঃ প্রেতলোকবিমুক্তিপূর্ব্বকস্বর্গলোকগমনকামঃ সোপকরণচন্দনাঙ্কিত ধেনুদানমহং করিষ্যামীতি সং-
কল্পয়েৎ। ততস্তজ্জলমৈশান্যাং ক্ষিপেৎ। ততঃ স্বশাখোক্ত সঙ্কল্পসূক্তং পঠেৎ। তত্র প্রথমং ব্রহ্মবরণম্। তত্র উত্তরামুং
ব্রাহ্মণমুপবেশ্য তৎসমীপে আসনমানীয় প্রাঙ্মুখো যজমানঃ প্রাঞ্জলির্ব্বদেৎ। ওঁ সাধু ভবানাস্তামিতি। ওঁ সাধ্বহমাসে ইতি প্রতিবচনং
দত্ত্বা ব্রাহ্মণস্তদাসনে উপবিশতি। ততো যজমানো ঽর্চ্চয়িষ্যামো ভবন্তং ইতি বদেৎ। ওঁ অর্চ্চয়েতি প্রতিবচনম্। ততো গন্ধ-
পুষ্পবস্ত্রালঙ্কারৈঃ সংপূজ্য দক্ষিণজানু ধৃত্বা ওঁ অদ্যেত্যাদি অমুক গোত্রায়াঃ প্রেতায়া অমুক্যা অশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক
কর্ম্মকরণায় অমুক গোত্রং অমুক দেবশর্ম্মাণমভ্যর্চ্চ্যামস্মিংশ্চন্দনাঙ্কিত ধেনুদানকর্ম্মণি ব্রহ্মকর্ম্ম করণায় ভবন্তমহং বৃণে ইতি ব্রাহ্মণং বৃণু-
য়াৎ। ওঁ বৃতোঽস্মীতি প্রতিবচনম্। ওঁ যথাবিহিতং ব্রহ্মকর্ম্ম কুরু ইতি বদেৎ। ওঁ যথাজ্ঞানং করবাণীতি প্রতিবচনং। স্বয়ং গানাশক্তৌ
ব্রহ্মকর্ম্মকরণায়েত্যত্র ব্রহ্মাদি কর্ম্মকরণায়েতি বদেৎ। স্বয়ং হোমাসামর্থ্যে হোতারমপি বৃণুয়াৎ। তত্র হোতৃকর্ম্মকরণায় ইতি
বিশেষঃ। আচার্য্যসদস্যৌ বৃণুয়াৎ। অঙ্গুল্যাদিপ্রমাণন্তু সর্ব্বত্র যজমানস্যৈব গ্রাহ্যম্। ততঃ পুণ্যাহং স্বস্তি ঋদ্ধিবাচনং কৃত্বা

॥ ● ॥ সর্ব্বসংকর্ম্মপদ্ধতিঃ ॥ ● ॥

চন্দনাঙ্কিত দাননিমিত্তকং হোমীয় হবিরক্ষয়ত্ব কামো ভারতনামোচ্চারণং কুর্য্যাৎ। ততো যজমানঃ হোতা বা গায়ত্র্যা গোমূত্রং গন্ধদ্বারেতি গোময়ম্ ওঁ অপ্যায়স্বেত্যাদিনা দুগ্ধম্ ওঁ দধিক্রাব্ণো হকার্যমিত্যাদিনা দধি ওঁ তেজোসীত্যাদিনা ঘৃতম্ ওঁ দেবস্য ত্বেত্যাদিনা কুশোদকং শোধয়িত্বা গায়ত্র্যা সর্ব্বমেকীকৃত্য তেন বেদীমভুক্ষ্য তত্র ঘটান্ সংস্থাপ্য গণেশং গ্রহান্ বিষ্ণুঞ্চ সংপূজ্য স্বগৃহোক্তং বিধিনাগ্নিং সংস্থাপ্য স্ব স্ব গৃহোক্ত বৃষোৎসর্গপদ্ধতিক্রমেণ কর্ম্ম কৃত্বা প্রাঙ্মুখীং ধেনুমগ্নিসমীপং নীত্বা ওঁ মানস্তোকে তনয়ে মান আয়ুষি মানো গোষু মানো অশ্বেষু রীরিষঃ। বরীন্মানো হবধীর্হবিষ্মন্তঃ সদসি ত্বা হবামহে ইতি মন্ত্রেণ ধেনো- র্বামসক্থিনি ষড়ঙ্গুল ত্রিশূলং সচন্দনেন কুশেন লিখেৎ। বীরান্মান ইতি সামগানাং যজুর্ব্বান্ত মানো বীরানিতি বহুভাগে পাঠঃ। ৩১২

ততঃ ওঁ বৃষাহসি ভানুনা ভ্রামন্তং ত্বা হবামহে। পবমানঃ স্বর্দৃশং ইত্যনেন দক্ষিণসক্থিনি পঞ্চাঙ্গুলমাবহীনং চক্রঞ্চ তথৈবা চার্য্যো লিখেৎ। ইত্যবসরে অগ্নেরুত্তরতঃ সবৎসধেনুমৌলিকং যূপমারোপয়েৎ। ততঃ স্বগৃহোক্ত বিধিনা বৃষবদ্ধেনুং স্নাপয়েৎ। ততঃ সিত বাসসা জলমপনীয় গন্ধচন্দনপুষ্পাঞ্জলিসিন্দূরগোরোচনাদ্রব্যৈ স্বর্ণশৃঙ্গাভ্যাং রৌপ্যখুরৈশ্চ বস্ত্রেণ কাংস্যক্রোড়েন তাম্রপৃষ্ঠেন ঘণ্টাচামরাভ্যাং যথাযোগ্যং তথা কর্ণয়োঃ প্রবালমাণিক্যাভ্যাঞ্চ ধেনুং ভূষয়িত্বা পাদ্যাদিভিরভ্যর্চ্চ্য স্ব স্ব গৃহোক্ত শ্রাব্যমন্ত্রান্ শ্রাবয়িত্বা চ প্রাঙ্মুখীং ধেনুং শুক্ল বাসসা যূপে বধ্নীয়াৎ। ততো যজমান উত্তরামুখাঃ ধেনোর্মানস্তোকাদি ক্রমেণ তত্তন্মন্ত্রৈঃ পূজয়েৎ। শিরসি ওঁ ব্রহ্মণে নমঃ। ললাটে ওঁ বৃষধ্বজায় নমঃ। কর্ণয়োঃ ওঁ অশ্বিনীকুমারাভ্যাং নমঃ চক্ষুযোঃ শশিভাস্করাভ্যাং নমঃ। জিহ্বায়াং সরস্বত্যৈ নমঃ। দন্তে বসুভ্যো নমঃ ওষ্ঠয়োঃ সন্ধ্যায়ৈ নমঃ। গ্রীবায়াং নীলকণ্ঠায় নমঃ

হৃদি স্কন্দায় নমঃ। রোমকূপেষু ঋষিভ্যো নমঃ। দক্ষিণপার্শ্বে কুবেরায় নমঃ। বামপার্শ্বে বরুণায় নমঃ। রোমাগ্রেষু রশ্মিভ্যো নমঃ। উরুষু ধর্ম্মায় নমঃ। জঙ্ঘাসু অধর্ম্মায় নমঃ। শ্রোণিতটে পিতৃভ্যঃ। খুরমধ্যে গন্ধর্ব্বেভ্যঃ। তদগ্রে অপ্সরোভ্যো নমঃ। লাঙ্গূলে দ্বাদশাদিত্যেভ্যঃ। গোময়ে মহালক্ষ্ম্যৈ। গোমূত্রে গঙ্গায়ৈ। পয়োধরেষু চতুঃসাগরায়। এবমোঙ্কারাদি নমোহন্তেন পূজয়িত্বা পঠেৎ। ওঁ ইন্দ্রস্য ত্বমিন্দ্রাণী বিষ্ণোর্লক্ষ্মীশ্চ যা স্থিতা। রুদ্রস্য গৌরী যা দেবী সা দেবী বরদাস্তু মে। ওঁ যা লক্ষ্মীর্লোকপালানাং যা চ দেবেষ্ববস্থিতা। ধেনুরূপেণ সা দেবী তস্যাঃ পাপং ব্যপোহতু। দেহস্থা যা চ রুদ্রাণী শঙ্করস্য সদা প্রিয়া। ধেনুরূপেণ সা দেবী তস্যাঃ শান্তিং প্রযচ্ছতু। ওঁ সর্ব্বদেবময়ী দোগ্ধ্রী সর্ব্বলোকময়ী তথা। ধেনুরূপেণ সা দেবী তস্যাঃ স্বর্গং প্রযচ্ছতু। ওঁ আচার্য্যায় নমঃ ইতি পাদ্যাদিভিঃ সম্প্রদান ব্রাহ্মণং সংপূজ্য ওঁ রুদ্রায় নমঃ ইতি তদ্দেবতাং সংপূজ্য ওঁ চন্দনাঙ্কিত সবৎস ধেনবে নমঃ ইত্যনেন ধেনুং সংপূজ্য প্রোক্ষ্য চ ব্রাহ্মণহস্তে জলং দত্ত্বা কুশতিলজলান্যাদয় ওঁ তৎ-সদদ্যেত্যাদি অমুক গোত্রায়াঃ প্রেতায়াঃ অমুক্যা অশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রায়াঃ প্রেতায়াঃ অমুক্যাঃ প্রেতলোব বিমুক্তি-পূর্ব্বক স্বর্গলোক গমনকামোঽহং এতাং সালঙ্কৃত চন্দনাঙ্কিত সবৎসাং ধেনুং রুদ্রদেবতাকাং অমুক গোত্রায় শ্রী অমুক দেবশর্ম্মণে আচা-র্য্যায় ব্রাহ্মণায় তুভ্যমহং সংপ্রদদানীতি ব্রাহ্মণহস্তে অভিলাপজলং দদ্যাৎ। ততঃ সম্প্রদান ব্রাহ্মণঃ পুচ্ছং ধৃত্বা ওঁ ইত্যুচ্চার্য্য সাবিত্রীং পঠেৎ। ততো ধেনুরিয়ং রুদ্রদেবতাকা ইতি বদেৎ। যথাশাখং কামস্তুতিঞ্চ পঠেৎ। যথা ক ইদং কস্মা অদাৎ কামঃ কামায়াদাৎ কামো দাতা কামঃ প্রতিগৃহীতা কামঃ সমুদ্রমাবিশৎ। কামেন ত্বাং প্রতিগৃহ্নামি কামৈতত্তে। জযুর্ব্বেদীয়ে ৩১৩

তু ওঁ দ্যৌস্ত্বা পরিদদাতু পৃথিবী ত্বা পরিগৃহ্লাতু ওঁ কোঽদাৎ কস্মা অদাৎ কামঃ কামায়াদাৎ কামো দাতা কামঃ প্রতি-
গৃহীতা কামৈতত্তে তব কামশতাৎ ভুনজামহে। ঋক্‌বেদী তু সামগমন্ত্রণামন্তে ওঁ হ্রষ্টিরসি দ্বৌস্ত্বা পরিদদাতু পৃথিবী ত্বা পরি-
গৃহ্লাতু ইত্যধিকম্। ততো যজমানঃ পুচ্ছোদকেন তর্পণং কুর্য্যাৎ। ওঁ অমুক গোত্রাং প্রেতামমুকী দেবীং এতৎ সতিল চন্দনা-
ঙ্কিত ধেনুপুচ্ছগলিতোদকেন তর্পয়ামি ইতি ত্রিস্তর্পয়েৎ। পুনস্তথৈব জলেন স্বধা পিতৃভ্যো মাতৃভ্যো বন্ধুভ্যশ্চাপি তৃপ্তয়ে। মাতৃ-
পক্ষাশ্চ যে কেচিৎ যে চান্যে পিতৃপক্ষজাঃ। গুরুশ্বশুরবন্ধূনাং যে কুলে চ সমুদ্ভবাঃ। যে প্রেতভাবমাপন্না যে চান্যে শ্রাদ্ধ-
বর্জ্জিতাঃ। ধেনূৎসর্গেণ তে সর্ব্বে লভন্তাং প্রীতিমুত্তমাম্। ইত্যুচার্য্য তিলসহিত জলং বারত্রয়ং দদ্যাৎ। ততঃ অদ্যেত্যাদি কৃতৈতৎ ৩১৪
মালঙ্কৃত চন্দনাঙ্কিত সবৎস ধেনুদানকর্ম্মণঃ সাঙ্গতার্থং দক্ষিণাং গোমূল্যং কাঞ্চনং বা বিষ্ণুদৈবতং অমুক গোত্রায়াচার্য্যায় ব্রাহ্ম-
ণায় তুভ্যমহং দদানীতি আচার্য্যায় দদ্যাৎ। আচার্য্যস্তু ওমিতি গৃহীত্বা স্বস্তীতি ব্রূয়াৎ। ততো বৃষোৎসর্গবন্মন্ত্রোহেণ
স্ব স্ব গৃহ্যোক্ত শ্রাব্যাদিনা শেষং কর্ম্ম সমাপয়েৎ। আহূতান্ অর্ঘ্যমাল্যাদিভিঃ পূজয়েৎ। সামগশ্চেৎ ইদানীং ব্রহ্ম-
হোত্রাচার্য্যসদস্যেভ্যো ব্রাহ্মণেভ্যো দক্ষিণাং বৃষোৎসর্গবৎ দদ্যাৎ। অন্যবেদী তু স্ব স্ব গৃহ্যোক্ত রীত্যা যথাকালং দক্ষিণাং বৃষোৎ-
সর্গবদ্দদ্যাৎ। শূদ্রস্তু যজুর্ব্বেদিবৎ সর্ব্বং কুর্য্যাৎ। মন্ত্রপাঠং ব্রাহ্মণেন কারয়েৎ। দীনান্ধানাথাদীংশ্চান্নাদৈ্যস্তোষয়েৎ। ইতি
চন্দনধেনুদান প্রয়োগঃ সমাপ্তঃ ॥ * ॥ * ॥ * ॥ * ॥

প্রণম্য সচ্চিদানন্দনং যজ্ঞরূপিণমীশ্বরম্। যজুর্ব্বিদাং বৃষোৎসর্গং বক্তি শ্রীরঘুনন্দনঃ॥ গোশালায়াং বিতানযুক্তায়াং পুণ্যভূমৌ বা প্রাগুদকপ্লবনং দেশং গোময়েনোপলিপ্য কৃতনিত্যক্রিয়ঃ আচান্ত উদঙ্মুখঃ স্বস্তিবাচ্য ওঁ তৎসদিত্যুচ্চার্য্য তদ্বিষ্ণোঃ পরমং পদং সদা পশ্যন্তি সূরয়ঃ দিবীব চক্ষুরাততম্। ইত্যুচ্চার্য্য বিষ্ণুং সংস্মৃত্য কুশতিলজলান্যাদায়। মুখ্যচান্দ্রেণ মাসোল্লেখঃ কার্য্যঃ। ওঁ অদ্যামুকে মাস্যামুক পক্ষে ঽমুক তিথাবমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো ঽশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ প্রেতলোকপরিত্যাগপূর্ব্বক স্বর্গলোকগমনকামঃ সোপকরণ বৎসতরীচতুষ্টয়সহিত বৃষোৎসর্গমহং করিষ্যামীতি সঙ্কল্পয়েৎ। স্বার্থঞ্চেৎ করিষ্যে ইতি বিশেষঃ। তজ্জলমৈশান্যাং ক্ষিপেৎ। ওঁ যজ্জাগ্রতো দূরমুদৈতি দৈবং তদুসুপ্তস্য তথৈবৈতি দূরং গমং জ্যোতিষাং জ্যোতিরেকং তন্মে মনঃ শিবসঙ্কল্পমস্তু। ইতি পঠেৎ। অন্যকালীনান্যোদ্দেশ্যকে বৃষোৎসর্গে যথাযোগ্যং বাক্যমূহনীয়ম্। প্রেতেতর বৃষোৎসর্গে বৃদ্ধিশ্রাদ্ধং কর্ত্তব্যম্। ততঃ ওঁ অদ্যেত্যাদি অমুক গোত্রস্য 
প্রেতস্যামুক দেবশর্ম্মণো ঽশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো বৃষোৎসর্গাঙ্গ হোমীয় হবিরক্ষয়ত্বকামো মহাভারতোচ্চারণমহং করিষ্যে। ইতি সঙ্কল্প্য ওঁ মহাভারতমিতি বদেৎ। ততঃ ওঁ অদ্যামুকে মাস্যামুক পক্ষে ঽমুক তিথৌ অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো ঽশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণো বৃষোৎসর্গাঙ্গ হোমীয় হবিরক্ষয়ত্ব কামঃ শ্রী কৃষ্ণদ্বৈপায়নাভিধান মহর্ষি বেদব্যাসপ্রোক্ত জয়াখ্য শতসাহস্র মহাভারতান্তর্গত জনমেজয় উবাচ কথং বিরাটনগরে নমপূর্ব্বপিতামহা ইত্যাদি শুশুভে মৎস্যরাজস্য নগরং ভরতর্ষভ ইত্যন্তং

উত্তরাভিমুখং ব্রাহ্মণমুপবেশ্য পুটাঞ্জলির্বদেৎ। ওঁ সাধু
বিরাটপর্ব্ব সকৃৎ পাঠনাকর্ম্মাহং করিষ্যে ইতি সংকল্প্য ব্রাহ্মণান্ বৃণুয়াৎ যথা। উত্তরাভিমুখং ব্রাহ্মণমুপবেশ্য পুটাঞ্জলির্বদেৎ। ওঁ সাধু
ভবানাস্তাং। ওঁ সাধ্বহমাসে। ইতি প্রতিবচনম্ কৃত্বাসনে ব্রাহ্মণ উদঙ্মুখ উপবিশতি। অর্চ্চয়িষ্যামো ভবন্তমিতি বদেৎ। ওঁ অর্চ্চয়
ইতি প্রতিবচনম্। ততো গন্ধপুষ্পতাম্বূলবস্ত্রালঙ্কারবাসাদিভিরভ্যর্চ্চ্য দক্ষিণং জানু স্পৃষ্ট্বা ওঁ অদ্যেত্যাদি অমুক গোত্রস্য প্রেতস্যামুক দেব-
শর্ম্মণো হশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রস্য প্রেতস্যামুক দেবশর্ম্মণঃ প্রেতলোক পরিত্যাগ পূর্ব্বক স্বর্গলোক গমনকামঃ মৎসঙ্কল্পিত-
বৃষোৎসর্গাঙ্গহোমকর্ম্মণি ব্রহ্মকর্ম্মকরণায় অমুক গোত্রং অমুক প্রবরং শ্রী অমুক দেবশর্ম্মাণমেভিঃ পাদ্যাদিভিরভ্যর্চ্চ ভবন্তমহং বৃণে। ওঁ
বৃতোঽস্মীতি প্রতিবচনম্। ওঁ যথাবিহিতং ব্রহ্মকর্ম্ম কুরু ইতি বদেৎ। ওঁ যথাজ্ঞানতঃ করবাণীতি প্রতিবচনম। স্বয়ং হোমা সামর্থ্যে 
হোতারমেবং বৃণুয়াৎ। তত্র হোতৃকর্ম্মকরণায়েতি বিশেষঃ। এবমাচার্য্যবরণং কুর্য্যাৎ। আচার্য্যস্তু পুস্তকমাদায় কর্ম্মোপদিশেৎ। আচা-
র্য্যান্তরাভাবে ব্রহ্মৈবাচার্য্যত্বেনবরণীয়ঃ। তদা ব্রহ্মাচার্য্যকর্ম্মকরণায়েতিবিশেষঃ। সদস্যবরণমপ্যেবং। ততো বিষ্ণুর্নমোঽদ্যেত্যাদি অমুক
গোত্রস্য প্রেতস্য অমুক দেবশর্ম্মণো হশৌচান্তাদ্দ্বিতীয়েঽহ্নি অমুক গোত্রস্য প্রেতস্য অমুক দেবশর্ম্মণঃ প্রেতলোক পরিত্যাগ পূর্ব্বক স্বর্গ-
লোক গমনকামঃ মৎসঙ্কল্পিতবৃষোৎসর্গাঙ্গ হোমীয় হবিরক্ষয়ত্ব কামঃ শ্রীকৃষ্ণদ্বৈপায়নাভিধান মহর্ষি বেদব্যাসপ্রোক্ত জয়াখ্য মহাভার-
তান্তর্গত জনমেজয় উবাচ কথং বিরাটনগরে মম পূর্ব্বপিতামহা ইত্যাদি শুশুভে মৎস্যরাজস্য নগরং ভরতর্ষভ ইত্যন্তং বিরাটপর্ব্ব
সকৃৎ পাঠনাকর্ম্মণি পাঠকর্ম্মকরণায় অমুক গোত্রং শ্রী অমুক দেবশর্ম্মাণং গন্ধাদিভিরভ্যর্চ্চ্য ভবন্তমহং বৃণে ওঁ বৃতোঽস্মীতি প্রতিবচনং
হস্তাঙ্গুল্যাদিপ্রমাণন্তু যাজমানিকমেব সর্ব্বত্র গ্রাহ্যম্। ততো যজমানো হোতা বা পঞ্চগব্যং শোধয়িত্বা যথা গায়ত্র্যা

গোমূত্রম্। ওঁ গন্ধদ্বারাং দুরাধর্ষাং নিত্যপুষ্টাঙ্করীষিণীম্। ঈশ্বরীং সর্ব্বভূতানাং তামিহোপহ্বয়ে শ্রিয়ং ইতি গোময়ম্। ওঁ আপ্যায়স্ব সমেতু তে বিশ্বতঃ সোমবৃষ্ণ্যং ভবাবা যস্য সঙ্গথে ইতি দুগ্ধম্। ওঁ দধিক্রাব্ণো অকার্ষং জিষ্ণোরশ্বস্য বাজিনঃ। সুরভিনো মুখাকরোৎ প্রণতায়ুংষি তারিষৎ ইতি দধি। ওঁ তেজোঽসি শুক্রমস্য মৃতমসি ধামনামাসি প্রিয়ং দেবানামনাধৃষ্ট্যং দেবযজনং ইতি ঘৃতম্। ওঁ দেবস্য ত্বা সবিতুঃ প্রসবে ঽশ্বিনোর্বাহুভ্যাং পূষ্ণো হস্তাভ্যাং হস্তমাদদে ইতি কুশোদকম্। ওঁ ইন্দ্রঘোষস্ত্বা বসুভিঃ পুরস্তাৎ পাতু। প্রচেতাস্ত্বা রুদ্রৈঃ পশ্চাৎ পাতু। মনোযবাস্ত্বা পিতৃভির্দক্ষিণতঃ পাতু। বিশ্বকর্ম্মা ত্বাদিত্যৈরুত্তরতঃ পাতু। ইত্যনেন বেদীমভ্যুক্ষ্য তত্র ঘটান্ সংস্থাপ্য যথা ওঁ ভূরসি ভূমিরস্যদিতিরসি বিশ্বস্য ভুবনস্য ধর্ত্রীং পৃথিবীং যচ্ছ পৃথিবীং দৃংহ পৃথিবীং মা হিংসীঃ। ইতি ভূমেঃ। ওঁ ধান্যমসি ধিনুহি দেবান্ ধিনুহি যজ্ঞং ধিনুহি যজ্ঞপতিং ধিনুহি মাং যজ্ঞন্যম্। ইতি ধান্যস্য। ওঁ আজিঘ্র কলসং মহ্যা ত্বা বিশন্ত্বিন্দবঃ পুনরূর্জা নিবর্ত্তস্ব সানঃ সহস্রং ধুক্ষোরুধারা পয়স্বতী পুনর্মাবিশতাদ্রয়ি। ইতি ঘটস্য। ওঁ ইমম্মে গঙ্গেযমুনে সরস্বতি শতদ্রুস্তোমং সচতাপরুষ্ণ্যা অসিক্ন্যা মরুদ্বৃধেবিতস্তয়া বিকীরে শৃণুহ্যাশিযো ময়া ইতি জলস্য। ওঁ ধন্বনা গা ধন্বনা জিঞ্জয়েম ধন্বনা তীব্রাঃ সমুদোজয়েম। ধনুঃ শত্রোরপকামং কৃণোতু ধন্বনা সর্ব্বাঃ প্রদিশো জয়েম। ইতি পল্লবস্য। ওঁ যাঃ ফলিনীর্যা অফলা অপুষ্পা যাশ্চ পুষ্পিণীঃ বৃহস্পতিপ্রসূতাস্তা নো মুঞ্চন্ত্বংহসঃ। ইতি ফলস্য। ওঁ স্থিরোভব বীড্বঙ্গ আশুর্ভব বাজ্যর্ব্বন্। পৃথুর্ভব সুষদস্ত্বমগ্নে পুরীষবাহন। ইতি স্থিরীকরণস্য। ওঁ সিন্ধোরিব প্রাধ্বনে সুঘনাসো বাতপ্রমিয়ঃ পতয়ন্তি যহ্বাং। ঘৃতস্য ধারা অরুষো ন বাজী কাষ্ঠা ভিন্দন্নূর্মিভিঃ পিন্বমানঃ। ইতি সিন্দূরস্য। ইত্যনেন সংস্থাপ্য

ঘটে গণেশং গ্রহান্ বিষ্ণুঞ্চ স্বৈঃ স্বৈর্ম্মন্ত্রৈর্গন্ধপুষ্পাদিভিঃ পূজয়েৎ। ইতি ভবিষ্যোক্তেঃ। ততো মণ্ডপস্যৈশান্যাং প্রাগুদক
প্লবনে দেশে হস্তমিতাং ভূমিং কুশত্রয়েণ উদকসংস্থাং পরিসমুহ্য কুশান্ ঐশান্যাং দিশি পরিত্যজ্য গোময়েনোদকসংস্থামেবো-
পলিপ্য খড়্গাকৃতিনা স্ফ্যেন কুশেন বা প্রাদেশমাত্রং উদকসংস্থং ত্রিরুল্লিখ্য ক্রমেণ রেখাস্থপাংশুকরং অঙ্গুষ্ঠতর্জ্জনীভ্যাং উদ্ধৃত্য
ঐশান্যাং দিশি প্রক্ষিপ্য বারিণাভ্যুক্ষ্য দক্ষিণে কাংস্যপাত্রস্থং জ্বলদিন্ধনং গৃহীত্বা ওঁ ক্রব্যাদমগ্নিং প্রহিণোমি
দূরং যমরাজ্যং গচ্ছতু রিপ্রবাহঃ। ইত্যনেন ক্রব্যাদাংশং পরিত্যজ্য ওঁ ইহৈবায়মিতরো জাতবেদা দেবেভ্যো হব্যং বহতু
প্রজানন্। ইত্যনেনাত্মাভিমুখং রেখোপরি স্থাপয়েৎ। ততো হগ্নে ত্বং বিশ্বরূপনামাসীতি নাম কৃত্বাবাহ্য সংপূজ্য ওঁ সর্ব্বতঃ
পাণিপাদান্তঃ সর্ব্বতো হক্ষিশিরোমুখঃ। বিশ্বরূপো মহানগ্নিঃ প্রণীতঃ সর্ব্বকর্ম্মসু। ইতি অগ্নিপ্রণয়নং কৃত্বাগ্নের্দক্ষিণতো ব্রহ্মা- ৩২৮
সনমাস্তরেৎ। ওঁ অহেদৈধি সব্যোদতস্তিষ্ঠান্যস্য সদনে সীদ যোঽস্মৎ পাকতর ইতি মন্ত্রেণাগ্নিং প্রদক্ষিণীকৃত্য গত্বা ব্রহ্মসদন
মীক্ষেৎ। অগ্নের্দ্দক্ষিণতঃ শুদ্ধমাসনং নিধায় তদুপরি প্রাগগ্রান্ কুশানাস্তীর্য্য প্রাঙ্মুখস্তিষ্ঠেৎ। অথ ব্রহ্মা ততস্তস্মাৎ আসনাৎ
কুশপত্রমেকং বামহস্তানামিকাঙ্গুষ্ঠাভ্যাং গৃহীত্বা ওঁ নিরস্তঃ পাপ্মাসহ তেন বয়ং দ্বিষ্মঃ। ইত্যনেন নৈর্ঋত কোণে নিরস্য
ওঁ ইদমহং বৃহস্পতেঃ সদনে সীদামি প্রসূতো দেবেন সবিত্রা তদগ্নয়ে প্রব্রবীমি তদ্বায়বে তৎপৃথিব্যৈ ইত্যনেন
অগ্নিমুখ উপবিশতি। ততো হোতা অগ্নেরুত্তরতঃ স্তরণভূমিমতীত্য কুশানাস্তীর্য্য তত্র বরুণকাষ্ঠময় ষড়ঙ্গুলবিস্তার বিংশত্যঙ্গুলদীর্ঘ চতু-
রঙ্গুলখাত চতুরঙ্গুলমূলদণ্ডাত্মক চমসং মৃণ্ময়পাত্রং বা বামহস্তোদ্ধৃত পাত্রস্য জলেন পূরয়িত্বা পরিস্তরণদেশাদুত্তরস্যাং দিশি